Prajnaparamitas. Satasaha-
strika
Satasahastrika prajna-
paramita

IX

BIBLIOTHECA INDICA:


A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1103.



शतसाहस्रिका प्रज्ञापारमिता ।

ÇATASĀHASRIKĀ-PRAJÑĀ-PĀRAMITĀ

A

THEOLOGICAL AND PHILOSOPHICAL DISCOURSE

OF

BUDDHA WITH HIS DISCIPLES

(IN A HUNDRED-THOUSAND STANZAS).

EDITED BY

PRATĀPACANDRA GHOṢA.

PART I. FAS. 9.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET,
1905.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 15, PICCADILLY, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

Advaita Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ... Rs.	1	8
Advaitachinta Kaustubhe, Fasc. 1–2	0	12
*Agni Purāṇa, (Text) Fasc. 4–14 @ /6/ each	4	2
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5; Vol. III, Fasc. 1–5, Vol. IV, Fasc. 1–5 @ /6/	7	8
Aṇu Bhāṣyam, (Text) Fasc. 2–5 @ /6/ each	1	8
Aphorisms of Sāṇḍilya, (English) Fasc. 1	0	12
Aṣṭasāhasrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each ...	2	4
Açvavaidyaka, (Text) Fasc. 1–5 @ /6/ each	1	14
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 2–5; Vol. II. Fasc. 1–5 @ 1/ each	9	0
Bāla Bhaṭṭī, Vol. I, Fasc. 1	0	6
Baudhayana Srauta Sutra, Fasc. 1–2 @ /6/ each	0	12
*Bhāmatī, (Text) Fasc. 4–8 @ /6/ each	1	14
Bhāṭṭa Dīpikā Vol. I, Fasc. 1–4	1	8
Bṛhaddēvatā (Text) Fasc. 1–4 @ /6/ each	1	8
Bṛhaddharma Purāṇa, (Text) Fasc. 1–6 @ /6/ each	2	4
Bodhicaryavatara of Cantidevi, Fasc. 1–2	0	12
Catadusani, Fasc. 1	0	6
Catalogue of Sanskrit Books and MSS., Fasc. 1–4 @ 2/ each ...	8	0
Çatapatha Brāhmaṇa, Vol. I, Fasc. 1–7; Vol. III, Fasc. 1–4 ...	4	2
Çatasahasrika-prajnaparamita (Text) Part I, Fasc. 1–7 @ /6/ each ...	2	10
*Caturvarga Chintāmaṇi (Text) Vols. II, 1–25; III. Part I, Fasc. 1–18. Part II, Fasc. 1–10 @ /6/ each; Vol IV, Fasc. 1	20	4
Çlokavartika, (English) Fasc. 1–4	3	0
*Çrauta Sūtra of Āpastamba, (Text) Fasc. 4–17 @ /6/ each ...	5	4
Ditto Çāṅkhāyana, (Text) Vol. I, Fasc. 1–7; Vol. II, Fasc. 1–4; Vol. III, Fasc. 1–4 @ /6/ each; Vol 4, Fasc. 1	6	0
Çrī Bhāshyam, (Text) Fasc. 1–3 @ /6/ each	1	2
Dan Kriya Kaumudi, Fasc. 1-2	0	12
Gadadhara Paddhati Kālasāra, Vol I, Fasc. 1–6...	2	4
Kāla Mādhava, (Text) Fasc. 1–4 @ /6/ each	1	8
Kāla Viveka, Fasc. 1–6	2	4
Kātantra, (Text) Fasc. 1–6 @ /12/ each	4	8
Kathā Sarit Sāgara, (English) Fasc. 1–14 @ /12/ each	10	8
Kūrma Purāṇa, (Text) Fasc. 1–9 @ /6/ each	3	6
Lalita-Vistara, (English) Fasc. 1–3 @ /12/ each	2	4
Madana Pārijāta, (Text) Fasc. 1–11 @ /6/ each...	4	2
Mahā-bhāṣya-pradīpōdyōta, (Text) Fasc. 1–9 & Vol. II, Fasc. 1–11 @ /6/ each	7	8
Manuṭīkā Saṅgraha, (Text) Fasc. 1–3 @ /6/ each	1	2
Mārkaṇḍēya Purāṇa, (English) Fasc. 1–8 @ /12 each	6	0
*Mīmāṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each	4	14
Nyāyavārtika, (Text) Fasc. 1–6 @ /6/	2	4
*Nirukta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each ...	5	4
Nityacarapaddhati Fasc. 1–7 (Text) @ /6/	2	10
Nityacarapradipb Fasc. 1–4	1	8
Nyayabindutıkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6 Vol. II, Fasc. 1–8 @ /6/ each	3	6

मशून्यमिति चरति । न कायं निमित्तमिति चरति । न काय-मनिमित्तमिति चरति । न कायं प्रणिहितमिति चरति । न कायमप्रणिहितमिति चरति । न कायं विविक्तमिति चरति । न कायमविविक्तमिति चरति ।

न मनसि चरति । न मनसो निमित्ते चरति । न मनोनित्य-मिति चरति । न मनोऽनित्यमिति चरति । न मनः सुखमिति चरति । न मनो दुःखमिति चरति । न मनः आत्मेति चरति । न मनोऽनात्मेति चरति । न मनः शान्तमिति चरति । न मनो-ऽशान्तमिति चरति । न मनः शून्यमिति चरति । न मनोऽशून्य-मिति चरति । न मनःनिमित्तमिति चरति । न मनोऽनिमित्त-मिति चरति । न मनः प्रणिहितमिति चरति । न मनोऽप्रणिहित-मिति चरति । न मनोविविक्तमिति चरति । न मनोऽविविक्त-मिति चरति ।

न रूपे चरति । न रूपस्य निमित्ते चरति । न रूपं नित्य-मिति चरति । न रूपमनित्यमिति चरति । न रूपं सुखमिति चरति । न रूपं दुःखमिति चरति । न रूपमात्मेति चरति । न रूपमनात्मेति चरति । न रूपं शान्तमिति चरति । न रूप-मशान्तमिति चरति । न रूपं शून्यमिति चरति । न रूपमशून्य-मिति चरति । न रूपं निमित्तमिति चरति । न रूपमनिमित्त-मिति चरति । न रूपं प्रणिहितमिति चरति । न रूपमप्रणि-हितमिति चरति । न रूपं विविक्तमिति चरति । न रूप-मविविक्तमिति चरति ।

न शब्दे चरति । न शब्दस्य निमित्ते चरति । न शब्दोनित्य इति चरति । न शब्दोऽनित्य इति चरति । न शब्दः सुख इति चरति । न शब्दः दुःख इति चरति । न शब्द आत्मेति चरति । न शब्दोऽनात्मेति चरति । न शब्दः शान्त इति चरति । न शब्दोऽशान्त इति चरति । न शब्दः शून्य इति चरति । न शब्दोऽशून्य इति चरति । न शब्दो निमित्त इति चरति । न शब्दोऽनिमित्त इति चरति । न शब्दः प्रणिहित इति चरति । न शब्दोऽप्रणिहित इति चरति । न शब्दो विविक्त इति चरति । न शब्दोऽविविक्त इति चरति ।

न गन्धे चरति । न गन्धस्य निमित्ते चरति । न गन्धो नित्य इति चरति । न गन्धोऽनित्य इति चरति । न गन्धः सुख इति चरति । न गन्धो दुःख इति चरति । न गन्ध आत्मेति चरति । न गन्धोऽनात्मेति चरति । न गन्धः शान्त इति चरति । न गन्धोऽशान्त इति चरति । न गन्धः शून्य इति चरति । न गन्धोऽशून्य इति चरति । न गन्धो निमित्तमिति चरति । न गन्धोऽनिमित्त इति चरति । न गन्धः प्रणिहित इति चरति । न गन्धोऽप्रणिहित इति चरति । न गन्धो विविक्त इति चरति । न गन्धोऽविविक्त इति चरति ।

न रसे चरति । न रसस्य निमित्ते चरति । न रसो नित्य इति चरति । न रसोऽनित्य इति चरति । न रसः सुख इति चरति । न रसो दुःख इति चरति । न रस आत्मेति चरति । न रसोऽनात्मेति चरति । न रसः शान्त इति चरति । न रसो-

ऽशान्त इति चरति। न रसः शून्य इति चरति। न रसोऽशून्य इति चरति। न रसो निमित्त इति चरति। न रसोऽनिमित्त इति चरति। न रसः प्रणिहित इति चरति। न रसोऽप्रणिहित इति चरति। न रसो विविक्त इति चरति। न रसोऽविविक्त इति चरति।

न स्पर्शे चरति। न स्पर्शस्य निमित्ते चरति। न स्पर्शो नित्य इति चरति। न स्पर्शोऽनित्य इति चरति। न स्पर्शः सुख इति चरति। न स्पर्शो दुःख इति चरति। न स्पर्श आत्मेति चरति। न स्पर्शोऽनात्मेति चरति। न स्पर्शः शान्त इति चरति। न स्पर्शो-ऽशान्त इति चरति। न स्पर्शः शून्य इति चरति। न स्पर्शो-ऽशून्य इति चरति। न स्पर्शो निमित्त इति चरति। न स्पर्शो-ऽनिमित्त इति चरति। न स्पर्शः प्रणिहित इति चरति। न स्पर्शोऽप्रणिहित चरति। न स्पर्शो विविक्त इति चरति। न स्पर्शो-ऽविविक्त इति चरति।

न धर्म्मेषु चरति। न धर्म्माणां निमित्ते चरति। न धर्म्माः नित्या इति चरति। न धर्म्माः अनित्या इति चरति। न धर्म्माः सुखा इति चरति। न धर्म्माः दुःखा इति चरति। न धर्म्माः आत्मान इति चरति। न धर्म्माः अनात्मान इति चरति। न धर्म्माः शान्त इति चरति। न धर्म्माः अशान्त इति चरति। न धर्म्माः शून्या इति चरति। न धर्म्माः अशून्या इति चरति। न धर्म्माः निमित्ता इति चरति। न धर्म्माः अनिमित्ता इति चरति। न धर्म्माः प्रणिहिता इति चरति। न धर्म्माः अप्रणिहिता इति

चरति। न धर्माः विविक्ता इति चरति। न धर्माः अविविक्ता इति चरति।

न चक्षुर्धातौ चरति। न चक्षुर्धातोर्निमित्ते चरति। न चक्षुर्धातुर्नित्य इति चरति। न चक्षुर्धातुरनित्य इति चरति। न चक्षुर्धातुः सुख इति चरति। न चक्षुर्धातुर्दुःख इति चरति। न चक्षुर्धातुरात्मेति चरति। न चक्षुर्धातुरनात्मेति चरति। न चक्षुर्धातुः शान्त इति चरति। न चक्षुर्धातुरशान्त इति चरति। न चक्षुर्धातुः शून्य इति चरति। न चक्षुर्धातुरशून्य इति चरति। न चक्षुर्धातुर्निमित्त इति चरति। न चक्षुर्धातुरनिमित्त इति चरति। न चक्षुर्धातुः प्रणिहित इति चरति। न चक्षुर्धातुरप्रणिहित इति चरति। न चक्षुर्धातुर्व्विविक्त इति चरति। न चक्षुर्धातुरविविक्त इति चरति।

न रूपधातौ चरति। न रूपधातोर्निमित्ते चरति। न रूपधातुर्नित्य इति चरति। न रूपधातुरनित्य इति चरति। न रूपधातुः सुख इति चरति। न रूपधातुर्दुःख इति चरति। न रूपधातुरात्मेति चरति। न रूपधातुरनात्मेति चरति। न रूपधातुः शान्त इति चरति। न रूपधातुरशान्त इति चरति। न रूपधातुः शून्य इति चरति। न रूपधातुरशून्य इति चरति। न रूपधातुर्निमित्त इति चरति। न रूपधातुरनिमित्त इति चरति। न रूपधातुः प्रणिहित इति चरति। न रूपधातुरप्रणिहित इति चरति। न रूपधातुर्व्विविक्त इति चरति। न रूपधातुरविविक्त इति चरति।

न चक्षुर्व्विज्ञानधातौ चरति। न चक्षुर्व्विज्ञानधातोर्निमित्ते चरति। न चक्षुर्व्विज्ञानधातुर्नित्य इति चरति। न चक्षुर्व्विज्ञानधातुरनित्य इति चरति। न चक्षुर्व्विज्ञानधातुः सुख इति चरति। न चक्षुर्व्विज्ञानधातुर्दुःख इति चरति। न चक्षुर्व्विज्ञानधातुरात्मेति चरति। न चक्षुर्व्विज्ञानधातुरनात्मेति चरति। न चक्षुर्व्विज्ञानधातुः शान्त इति चरति। न चक्षुर्व्विज्ञानधातुरशान्त इति चरति। न चक्षुर्व्विज्ञानधातुः शून्य इति चरति। न चक्षुर्व्विज्ञानधातुरशून्य इति चरति। न चक्षुर्व्विज्ञानधातुर्निमित्त इति चरति। न चक्षुर्व्विज्ञानधातुरनिमित्त इति चरति। च चक्षुर्व्विज्ञानधातुः प्रणिहित इति चरति। न चक्षुर्व्विज्ञानधातुरप्रणिहित इति चरति। न चक्षुर्व्विज्ञानधातुर्व्विविक्त इति चरति। न चक्षुर्व्विज्ञानधातुरविविक्त इति चरति।

न श्रोत्रधातौ चरति। न श्रोत्रधातोर्निमित्ते चरति। न श्रोत्रधातुर्नित्य इति चरति। न श्रोत्रधातुरनित्य इति चरति। न श्रोत्रधातुः सुख इति चरति। न श्रोत्रधातुर्दुःख इति चरति। न श्रोत्रधातुरात्मेति चरति। न श्रोत्रधातुरनात्मेति चरति न श्रोत्रधातुः शान्त इति चरति। न श्रोत्रधातुरशान्त इति चरति। न श्रोत्रधातुः शून्य इति चरति। न श्रोत्रधातुरशून्य इति चरति। न श्रोत्रधातुर्निमित्त इति चरति। न श्रोत्रधातुरनिमित्त इति चरति। न श्रोत्रधातुः प्रणिहित इति चरति। न श्रोत्रधातुरप्रणिहित इति चरति। न श्रोत्रधातुर्व्विविक्त इति चरति। न श्रोत्रधातुरविविक्त इति चरति।

न शब्दधातौ चरति। न शब्दधातोर्निमित्ते चरति। न शब्दधातुर्नित्य इति चरति। न शब्दधातुरनित्य इति चरति। न शब्दधातुः सुख इति चरति। न शब्दधातुर्दुःख इति चरति। न शब्दधातुरात्मेति चरति। न शब्दधातुरनात्मेति चरति। न शब्दधातुः शान्त इति चरति। न शब्दधातुरशान्त इति चरति। न शब्दधातुः शून्य इति चरति। न शब्दधातुरशून्य इति चरति। न शब्दधातुः प्रणिहित इति चरति। न शब्दधातुरप्रणिहित इति चरति। न शब्दधातुर्व्विविक्त इति चरति। न शब्दधातुरविविक्त इति चरति।

न श्रोत्रविज्ञानधातौ चरति। न श्रोत्रविज्ञानधातोर्निमित्ते चरति। न श्रोत्रविज्ञानधातुर्नित्य इति चरति। न श्रोत्रविज्ञानधातुरनित्य इति चरति। न श्रोत्रविज्ञानधातुः सुख इति चरति। न श्रोत्रविज्ञानधातुर्दुःख इति चरति। न श्रोत्रविज्ञानधातुरात्मेति चरति। न श्रोत्रविज्ञानधातुरनात्मेति चरति। न श्रोत्रविज्ञानधातुः शान्त इति चरति। न श्रोत्रविज्ञानधातुरशान्त इति चरति। न श्रोत्रविज्ञानधातुः शून्य इति चरति। न श्रोत्रविज्ञानधातुरशून्य इति चरति। न श्रोत्रविज्ञानधातुर्निमित्त इति चरति। न श्रोत्रविज्ञानधातुरनिमित्त इति चरति। न श्रोत्रविज्ञानधातुः प्रणिहित इति चरति। न श्रोत्रविज्ञानधातुरप्रणिहित इति चरति। न श्रोत्रविज्ञानधातुर्व्विविक्त इति चरति। न श्रोत्रविज्ञानधातुरविविक्त इति चरति।

न घ्राणधातौ चरति। न घ्राणधातोर्निमित्ते इति चरति।

न घ्राणधातुर्नित्य इति चरति। न घ्राणधातुरनित्य इति चरति। न घ्राणधातुः सुख इति चरति। न घ्राणधातुर्दुःख इति चरति। न घ्राणधातुरात्मेति चरति। न घ्राणधातुरनात्मेति चरति। न घ्राणधातुः शान्त इति चरति। न घ्राणधातुरशान्त इति चरति। न घ्राणधातुः शून्य इति चरति। न घ्राणधातुरशून्य इति चरति। न घ्राणधातुर्निमित्त इति चरति। न घ्राणधातुरनिमित्त इति चरति। न घ्राणधातुः प्रणिहित इति चरति। न घ्राणधातुरप्रणिहित इति चरति। न घ्राणधातुर्व्विविक्त इति चरति। न घ्राणधातुरविविक्त इति चरति।

न गन्धधातौ चरति। न गन्धधातोर्निमित्ते चरति। न गन्धधातुर्नित्य इति चरति। न गन्धधातुरनित्य इति चरति। न गन्धधातुः सुख इति चरति। न गन्धधातुर्दुःख इति चरति। न गन्धधातुरात्मेति चरति। न गन्धधातुरनात्मेति चरति। न गन्धधातुः शान्त इति चरति। न गन्धधातुरशान्त इति चरति। न गन्धधातुः शून्य इति चरति। न गन्धधातुरशून्य इति चरति। न गन्धधातुर्निमित्त इति चरति। न गन्धधातुरनिमित्त इति चरति। न गन्धधातुः प्रणिहित इति चरति। न गन्धधातुरप्रणिहित इति चरति। न गन्धधातुर्व्विविक्त इति चरति। न गन्धधातुरविविक्त इति चरति।

न घ्राणविज्ञानधातौ चरति। न घ्राणविज्ञानधातोर्निमित्ते इति चरति। न घ्राणविज्ञानधातुर्नित्य इति चरति। न घ्राणविज्ञानधातुरनित्य इति चरति। न घ्राणविज्ञानधातुः सुख इति

चरति। न घ्राणविज्ञानधातुर्दुःख इति चरति। न घ्राणविज्ञानधातुरात्मेति चरति। न घ्राणविज्ञानधातुरनात्मेति चरति। न घ्राणविज्ञानधातुः शान्त इति चरति। न घ्राणविज्ञानधातुरशान्त इति चरति। न घ्राणविज्ञानधातुः शून्य इति चरति। न घ्राणविज्ञानधातुरशून्य इति चरति। न घ्राणविज्ञानधातुर्निमित्त इति चरति। न घ्राणविज्ञानधातुरनिमित्त इति चरति। न घ्राणविज्ञानधातुः प्रणिहित इति चरति। न घ्राणविज्ञानधातुरप्रणिहित इति चरति। न घ्राणविज्ञानधातुर्व्विविक्त इति चरति। न घ्राणविज्ञानधातुरविविक्त इति चरति।

न जिह्वाधातौ चरति। न जिह्वाधातोर्निमित्ते चरति। न जिह्वाधातुर्नित्य इति चरति। न जिह्वाधातुरनित्य इति चरति। न जिह्वाधातुः सुख इति चरति। न जिह्वाधातुर्दुःख इति चरति न जिह्वाधातुरात्मेति चरति। न जिह्वाधातुरनात्मेति चरति। न जिह्वाधातुः शान्त इति चरति। न जिह्वाधातुरशान्त इति चरति। न जिह्वाधातुः शून्य इति चरति; न जिह्वाधातुरशून्य इति चरति। न जिह्वाधातुर्निमित्त इति चरति। न जिह्वाधातुरनिमित्त इति चरति। न जिह्वाधातुः प्रणिहित इति चरति। न जिह्वाधातुरप्रणिहित इति चरति। न जिह्वाधातुर्व्विविक्त इति चरति। न जिह्वाधातुरविविक्त इति चरति।

न रसधातौ चरति। न रसधातोर्निमित्ते चरति। न रसधातुर्नित्य इति चरति। न रसधातुरनित्य इति चरति। न रसधातुः सुख इति चरति। न रसधातुर्दुःख इति चरति। न

रसधातुरात्मेति चरति। न रसधातुरनात्मेति चरति। न रसधातुः शान्त इति चरति। न रसधातुरशान्त इति चरति। न रसधातुः शून्य इति चरति। न रसधातुरशून्य इति चरति। न रसधातुर्निमित्त इति चरति। न रसधातुरनिमित्त इति चरति। न रसधातुः प्रणिहित इति चरति। न रसधातुरप्रणिहित इति चरति। न रसधातुर्विविक्त इति चरति। न रसधातुरविविक्त इति चरति।

न जिह्वाविज्ञानधातौ चरति। न जिह्वाविज्ञानधातोर्निमित्ते चरति। न जिह्वाविज्ञानधातुर्नित्य इति चरति। न जिह्वाविज्ञानधातुरनित्य इति चरति। न जिह्वाविज्ञानधातुः सुख इति चरति। न जिह्वाविज्ञानधातुर्दुःख इति चरति। न जिह्वाविज्ञानधातुरात्मेति चरति। न जिह्वाविज्ञानधातुरनात्मेति चरति। न जिह्वाविज्ञानधातुः शान्त इति चरति। न जिह्वाविज्ञानधातुरशान्त इति चरति। न जिह्वाविज्ञानधातुः शून्य इति चरति। न जिह्वाविज्ञानधातुरशून्य इति चरति। न जिह्वाविज्ञानधातुर्निमित्त इति चरति। न जिह्वाविज्ञानधातुरनिमित्त इति चरति। न जिह्वाविज्ञानधातुः प्रणिहित इति चरति। न जिह्वाविज्ञानधातुरप्रणिहित इति चरति। न जिह्वाविज्ञानधातुर्विविक्त इति चरति। न जिह्वाविज्ञानधातुरविविक्त इति चरति।

न कायधातौ चरति। न कायधातोर्निमित्ते चरति। न कायधातुर्नित्य इति चरति। न कायधातुरनित्य इति चरति। न कायधातुः सुख इति चरति। न कायधातुर्दुःख इति चरति।

न कायधातुरात्मेति चरति। न कायधातुरनात्मेति चरति। न कायधातुः शान्त इति चरति। न कायधातुरशान्त इति चरति। न कायधातुः शून्य इति चरति। न कायधातुरशून्य इति चरति। न कायधातुर्निमित्त इति चरति। न कायधातुरनिमित्त इति चरति। न कायधातुः प्रणिहित इति चरति। न कायधातुरप्रणिहित इति चरति। न कायधातुर्व्विविक्त इति चरति। न कायधातुरविविक्त इति चरति।

न स्प्रष्टव्यधातौ चरति। न स्प्रष्टव्यधातोर्निमित्ते चरति। न स्प्रष्टव्यधातुर्नित्य इति चरति। न स्प्रष्टव्यधातुरनित्य इति चरति। न स्प्रष्टव्यधातुः सुख इति चरति। न स्प्रष्टव्यधातुर्दुःख इति चरति। न स्प्रष्टव्यधातुरात्मति चरति। न स्प्रष्टव्यधातुरनात्मेति चरति। न स्प्रष्टव्यधातुः शान्त इति चरति। न स्प्रष्टव्यधातुरशान्त इति चरति। न स्प्रष्टव्यधातुः शून्य इति चरति। न स्प्रष्टव्यधातुरशून्य इति चरति। न स्प्रष्टव्यधातुर्निमित्त इति चरति। न स्प्रष्टव्यधातुरनिमित्त इति चरति। न स्प्रष्टव्यधातुः प्रणिहित इति चरति। न स्प्रष्टव्यधातुरप्रणिहित इति चरति। न स्प्रष्टव्यधातुर्व्विविक्त इति चरति। न स्प्रष्टव्यधातुरविविक्त इति चरति।

न कायविज्ञानधातौ चरति। न कायविज्ञानधातोर्निमित्ते चरति। न कायविज्ञानधातुर्नित्य इति चरति। न कायविज्ञानधातुरनित्य इति चरति। न कायविज्ञानधातुःसुख इति चरति। न कायविज्ञानधातुर्दुःख इति चरति। न कायविज्ञानधातुरात्मेति चरति। न कायविज्ञानधातुरनात्मेति चरति।

न कायविज्ञानधातुःशान्त इति चरति। न कायविज्ञानधातुरशान्त इति चरति। न कायविज्ञानधातुःशून्य इति चरति। न कायविज्ञानधातुरशून्य इति चरति। न कायविज्ञानधातुर्निमित्त इति चरति। न कायविज्ञान धातुरनिमित्त इति चरति। न कायविज्ञानधातुः प्रणिहित इति चरति। न कायविज्ञानधातुरप्रणिहित इति चरति। न कायविज्ञानधातुर्व्विविक्त इति चरति। न कायविज्ञानधातुरविविक्त इति चरति।

न मनोधातौ चरति। न मनोधातोर्निमित्ते चरति। न मनोधातुर्नित्य इति चरति। न मनोधातुरनित्य इति चरति। न मनोधातुः सुख इति चरति। न मनोधातुर्दुःख इति चरति। न मनोधातुरात्मेति चरति। न मनोधातुरनात्मेति चरति। न मनोधातुः शान्त इति चरति। न मनोधातुरशान्त इति चरति। न मनोधातुः शून्य इति चरति। न मनोधातुरशून्य इति चरति। न मनोधातुर्निमित्त इति चरति। न मनोधातुरनिमित्त इति चरति। न मनोधातुः प्रणिहित इति चरति। न मनोधातुरप्रणिहित इति चरति। न मनोधातुर्व्विविक्त इति चरति। न मनोधातुरविविक्त इति चरति।

न धर्म्मधातौ चरति। न धर्म्मधातोर्निमित्ते चरति। न धर्म्मधातुर्नित्य इति चरति। न धर्म्मधातुरनित्य इति चरति। न धर्म्मधातुः सुख इति चरति। न धर्म्मधातुर्दुःख इति चरति। न धर्म्मधातुरात्मेति चरति। न धर्म्मधातुरनात्मेति चरति। न धर्म्मधातुः शान्त इति चरति। न धर्म्मधातुरशान्त इति

चरति। न धर्म्मधातुः शून्य इति चरति। न धर्म्मधातुरशून्य इति चरति। न धर्म्मधातुर्निर्मित्त इति चरति। न धर्म्मधातुरनिमित्त इति चरति। न धर्म्मधातुः प्रणिहित इति चरति। न धर्म्मधातुरप्रणिहित इति चरति। न धर्म्मधातुर्व्विविक्त इति चरति। न धर्म्मधातुरविविक्त इति चरति।

न मनोविज्ञानधातौ चरति। न मनोविज्ञानधातोर्निर्मित्ते चरति। न मनोविज्ञानधातुर्नित्य इति चरति। न मनोविज्ञानधातुरनित्य इति चरति। न मनोविज्ञानधातुः सुख इति चरति। न मनोविज्ञानधातुर्दुःख इति चरति। न मनोविज्ञानधातुरात्मेति चरति। न मनोविज्ञानधातुरनात्मेति चरति। न मनोविज्ञानधातुः शान्त इति चरति। न मनोविज्ञानधातुरशान्त इति चरति। न मनोविज्ञानधातुः शून्य इति चरति। न मनोविज्ञानधातुरशून्य इति चरति। न मनोविज्ञानधातुः प्रणिहित इति चरति। न मनोविज्ञानधातुरप्रणिहित इति चरति। न मनोविज्ञानधातुर्व्विविक्त इति चरति। न मनोविज्ञानधातुरविविक्त इति चरति।

न पृथिवीधातौ चरति। न पृथिवीधातोर्निर्मित्ते चरति। न पृथिवीधातुर्नित्य इति चरति। न पृथिवीधातुरनित्य इति चरति। न पृथिवीधातुः सुख इति चरति। न पृथिवीधातुर्दुःख इति चरति। न पृथिवीधातुरात्मेति चरति। न पृथिवीधातुरनात्मेति चरति। न पृथिवीधातुः शान्त इति चरति। न पृथिवीधातुरशान्त इति चरति। न पृथिवीधातुः शून्य इति

चरति। न पृथिवीधातुरशून्य इति चरति। न पृथिवीधातुर्निमित्त इति चरति। न पृथिवीधातुरनिमित्त इति चरति। न पृथिवीधातुः प्रणिहित इति चरति। न पृथिवीधातुरप्रणिहित इति चरति। न पृथिवीधातुर्व्विविक्त इति चरति। न पृथिवीधातुरविविक्त इति चरति।

नाऽब्धातौ चरति। नाऽब्धातोर्निमित्ते चरति। नाऽब्धातुर्नित्य इति चरति। नाऽब्धातुरनित्य इति चरति। नाऽब्धातुः सुख इति चरति। नाऽब्धातुर्दुःख इति चरति। नाऽब्धातुरात्मेति चरति। नाऽब्धातुरनात्मेति चरति। नाऽब्धातुः शान्त इति चरति। नाऽब्धातुरशान्त इति चरति। नाऽब्धातुः शून्य इति चरति। नाऽब्धातुरशून्य इति चरति। नाऽब्धातुः प्रणिहित इति चरति। नाऽब्धातुरप्रणिहित इति चरति। नाऽब्धातुर्व्विविक्त इति चरति। नाऽब्धातुरविविक्त इति चरति।

न तेजोधातौ चरति। न तेजोधातोर्निमित्ते चरति। न तेजोधातुर्नित्य इति चरति। न तेजोधातुरनित्य इति चरति। न तेजोधातुः सुख इति चरति। न तेजोधातुर्दुःख इति चरति। न तेजोधातुरात्मेति चरति। न तेजोधातुरनात्मेति चरति। न तेजोधातुः शान्त इति चरति। न तेजोधातुरशान्त इति चरति। न तेजोधातुः शून्य इति चरति। न तेजोधातुरशून्य इति चरति। न तेजोधातुर्निमित्त इति चरति। न तेजोधातुरनिमित्त इति चरति। न तेजोधातुः प्रणिहित इति चरति। न तेजोधातुरप्रणिहित इति चरति। न तेजोधातुर्व्विविक्त इति चरति। न तेजोधातुरविविक्त इति चरति।

न वायुधातौ चरति। न वायुधातोर्निमित्ते चरति। न वायुधातुर्नित्य इति चरति। न वायुधातुरनित्य इति चरति। न वायुधातुः सुख इति चरति। न वायुधातुर्दुःख इति चरति। न वायुधातुरात्मेति चरति। न वायुधातुरनात्मेति चरति। न वायुधातुः शान्त इति चरति। न वायुधातुरशान्त इति चरति। न वायुधातुः शून्य इति चरति। न वायुधातुरशून्य इति चरति। न वायुधातुर्निमित्त इति चरति। न वायुधातुरनिमित्त इति चरति। न वायुधातुः प्रणिहित इति चरति। न वायुधातुरप्रणिहित इति चरति। न वायुधातुर्व्विविक्त इति चरति। न वायुधातुरविविक्त-इति चरति।

नाकाशधातौ चरति। नाकाशधातोर्निमित्ते चरति। नाकाशधातुर्नित्य इति चरति। नाकाशधातुरनित्य इति चरति। नाकाशधातुः सुख इति चरति। नाकाशधातुर्दुःख इति चरति। नाकाशधातुरात्मेति चरति। नाकाशधातुरनात्मेति चरति। नाकाशधातुः शून्य इति चरति। नाकाशधातुरशून्य इति चरति। नाकाशधातुर्निमित्त इति चरति। नाकाशधातुरनिमित्त इति चरति। नाकाशधातुःप्रणिहित इति चरति। नाकाशधातुरप्रणि-हित इति चरति। नाकाशधातुर्व्विविक्त इति चरति। नाकाश-धातुरविविक्त इति चरति।

न विज्ञानधातौ चरति। न विज्ञानधातोर्निमित्ते चरति। न विज्ञानधातुर्नित्य इति चरति। न विज्ञानधातुरनित्य इति चरति। न विज्ञानधातुः सुख इति चरति। न विज्ञानधातुर्दुःख

इति चरति। न विज्ञानधातुरात्मेति चरति। न विज्ञानधातु-रनात्मेति चरति। न विज्ञानधातुः शान्त इति चरति। न विज्ञान-धातुरशान्त इति चरति। न विज्ञानधातुः शून्य इति चरति। न विज्ञानधातुरशून्य इति चरति। न विज्ञानधातुर्निमित्त इति चरति। न विज्ञानधातुरनिमित्त इति चरति। न विज्ञानधातुः प्रणिहित इति चरति। न विज्ञानधातुरप्रणिहित इति चरति। न विज्ञानधातुर्व्विविक्त इति चरति। न विज्ञानधातुरविविक्त इति चरति।

नाऽविद्यायां चरति। नाऽविद्यायाःनिमित्ते चरति। नाऽविद्या-नित्येति चरति। नाऽविद्याऽनित्येति चरति। नाऽविद्या सुखेति चरति। नाऽविद्यादुःखेति चरति। नाऽविद्या आत्मेति चरति। नाऽविद्याऽनात्मेति चरति। नाऽविद्याशान्तेति चरति। नाऽविद्या-ऽशान्तेति चरति। नाऽविद्याशून्येति चरति। नाऽविद्याऽशून्येति चरति। नाऽविद्यानिमित्तेति चरति। नाऽविद्याऽनिमित्तेति चरति। नाऽविद्याप्रणिहितेति चरति। नाऽविद्याऽप्रणिहितेति चरति। नाऽविद्याविविक्तेति चरति। नाऽविद्याऽविविक्तेति चरति।

न संस्कारेषु चरति। न संस्काराणां निमित्ते चरति। न संस्काराः नित्या इति चरति। न संस्कारा अनित्या इति चरति। न संस्काराः सुखा इति चरति। न संस्काराः दुःखा इति चरति। न संस्कारा आत्मा इति चरति। न संस्कारा अनात्मा इति चरति। न संस्काराः शान्ता इति चरति। न संस्कारा अशान्ता इति चरति। न संस्काराः शून्या इति चरति। न संस्कारा

अशून्या इति चरति। न संस्काराः निमित्ता इति चरति। न संस्कारा अनिमित्ता इति चरति। न संस्काराः प्रणिहिता इति चरति। न संस्कारा अप्रणिहिता इति चरति। न संस्काराः विविक्ता इति चरति। न संस्कारा अविविक्ता इति चरति।

न विज्ञाने चरति। न विज्ञानस्य निमित्ते चरति। न विज्ञानं नित्यमिति चरति। न विज्ञानमनित्यमिति चरति। न विज्ञानं सुखमिति चरति। न विज्ञानं दुःखमिति चरति। न विज्ञानमात्मेति चरति। न विज्ञानमनात्मेति चरति। न विज्ञानं शान्तमिति चरति। न विज्ञानमशान्तमिति चरति। न विज्ञानं शून्यमिति चरति। न विज्ञानमशून्यमिति चरति। न विज्ञानं निमित्तमिति चरति। न विज्ञानमनिमित्तमिति चरति। न विज्ञानं प्रणिहितमिति चरति। न विज्ञानमप्रणिहितमिति चरति। न विज्ञानं विविक्तमिति चरति। न विज्ञानमविविक्तमिति चरति।

न नामरूपे चरति। न नामरूपस्य निमित्ते चरति। न नामरूपं नित्यमिति चरति। न नामरूपमनित्यमिति चरति। न नामरूपं सुखमिति चरति। न नामरूपं दुःखमिति चरति। न नामरूपमात्मेति चरति। न नामरूपमनात्मेति चरति। न नामरूपं शान्तमिति चरति। न नामरूपमशान्तमिति चरति। न नामरूपं शून्यमिति चरति। न नामरूपमशून्यमिति चरति। न नामरूपं निमित्तमिति चरति। न नामरूपमनिमित्तमिति चरति। न नामरूपं प्रणिहितमिति चरति। न नामरूपमप्रणि-

हितमिति चरति। न नामरूपं विविक्तमिति चरति। न नामरूपमविविक्तमिति चरति।

न षड़ायतने चरति। न षड़ायतनस्य निमित्ते चरति। न षड़ायतनं नित्यमिति चरति। न षड़ायतनमनित्यमिति चरति। न षड़ायतनं सुखमिति चरति। न षड़ायतनं दुःखमिति चरति। न षड़ायतनमात्मेति चरति। न षड़ायतनमनात्मेति चरति। न षड़ायतनं शान्तमिति चरति। न षड़ायतनमशान्तमिति चरति। न षड़ायतनं शून्यमिति चरति। न षड़ायतनमशून्यमिति चरति। न षड़ायतनं निमित्तमिति चरति। न षड़ायतनमनिमित्तमिति चरति। न षड़ायतनं प्रणिहितमिति चरति। न षड़ायतनमप्रणिहितमिति चरति। न षड़ायतनं विविक्तमिति चरति। षड़ायतनमविविक्तमिति चरति।

न स्पर्शे चरति। न स्पर्शस्य निमित्ते चरति। न स्पर्शोनित्य इति चरति। न स्पर्शोऽनित्य इति चरति। न स्पर्शः सुख इति चरति। न स्पर्शोदुःख इति चरति। न स्पर्शः आत्मेति चरति। न स्पर्शः अनात्मेति चरति। न स्पर्शः शान्त इति चरति। न स्पर्शोऽशान्त इति चरति। न स्पर्शः शून्य इति चरति। न स्पर्शोऽशून्य इति चरति। न स्पर्शः निमित्त इति चरति। न स्पर्शोऽनिमित्त इति चरति। न स्पर्शः प्रणिहित इति चरति। न स्पर्शोऽप्रणिहित इति चरति। न स्पर्शो विविक्त इति चरति। न स्पर्शोऽविविक्त इति चरति।

न वेदनायां चरति। न वेदनायाः निमित्ते चरति। न

वेदना नित्येति चरति। न वेदनाऽनित्येति चरति। न वेदना सुखेति चरति। न वेदना दुःखेति चरति। न वेदना आत्मेति चरति। न वेदना अनात्मेति चरति। न वेदना शान्तेति चरति। न वेदना अशान्तेति चरति। न वेदना शून्येति चरति। न वेदनाऽशून्येति चरति। न वेदना निमित्तेति चरति। न वेदनाऽनिमित्तेति चरति। न वेदना प्रणिहितेति चरति। न वेदनाऽप्रणिहितेति चरति। न वेदना विविक्तेति चरति। न वेदनाऽविविक्तेति चरति।

न तृष्णायां चरति। न तृष्णायाः निमित्ते चरति। न तृष्णा नित्येति चरति। न तृष्णा अनित्येति चरति। न तृष्णा सुखेति चरति। न तृष्णा दुःखेति चरति। न तृष्णा आत्मेति चरति। न तृष्णा अनात्मेति चरति। न तृष्णा शान्तेति चरति। न तृष्णा अशान्तेति चरति। न तृष्णा शून्येति चरति। न तृष्णाऽशून्येति चरति। न तृष्णा निमित्तेति चरति। न तृष्णाऽनिमित्तेति चरति। न तृष्णा प्रणिहितेति चरति। न तृष्णाऽप्रणिहितेति चरति। न तृष्णा विविक्तेति चरति। न तृष्णाऽविविक्तेति चरति।

नोपादाने चरति। नोपादानस्य निमित्ते चरति। नोपादानं नित्यमिति चरति। नोपादानमनित्यमिति चरति। नोपादानं सुखमिति चरति नोपादानं दुःखमिति चरति। नोपादानमात्मेति चरति। नोपादानमनात्मेति चरति। नोपादानं शान्तमिति चरति। नोपादानमशान्तमिति चरति। नोपादानं शून्य-

मिति चरति। नोपादानमशून्यमिति चरति। नोपादानं निमित्त-मिति चरति। नोपादानमनिमित्तमिति चरति। नोपादानं प्रणिहितमिति चरति। नोपादानमप्रणिहितमिति चरति। नोपादानं विविक्तमिगि चरति। नोपादानमविविक्तमिति चरति।

न भवे चरति। न भवस्य निमित्ते चरति। न भवोनित्य इति चरति। न भवोऽनित्य इति चरति। न भवः सुख इति चरति। न भवोदुःख इति चरति। न भवः आत्मेति चरति। न भवोऽनात्मेति चरति। न भवः शान्त इति चरति। न भवोऽशान्त इति चरति। न भवः शून्य इति चरति। न भवोऽशून्य इति चरति। न भवोनिमित्त इति चरति। न भवोऽनिमित्त इति चरति। न भवः प्रणिहित इति चरति। न भवोऽप्रणिहित इति चरति। न भवोविविक्त इति चरति। न भवोऽविविक्त इति चरति।

न जातौ चरति। न जातेर्निमित्ते चरति। न जातिर्नित्येति चरति। न जातिरनित्येति चरति। न जातिः सुखेति चरति। न जातिर्दुःखेति चरति। न जातिरात्मेति चरति। न जातिरना-त्मेति चरति। न जातिः शान्तेति चरति। न जातिरशान्तेति चरति। न जातिः शून्येति चरति। न जातिरशून्येति चरति। न जातिर्निमित्तेति चरति। न जातिरनिमित्तेति चरति। न जातिः प्रणिहितेति चरति। न जातिरप्रणिहितेति चरति। न जातिर्व्विविक्तेति चरति। न जातिरविविक्तेति चरति।

न जरामरणे चरति। न जरामरणस्य निमित्ते चरति। न

जरामरणं नित्यमिति चरति । न जरामरणमनित्यमिति चरति । न जरामरणं सुखमिति चरति । न जरामरणं दुःखमिति चरति । न जरामरणमात्मेति चरति । न जरामरणमनात्मेति चरति । न जरामरणं शान्तमिति चरति । न जरामरणमशान्तमिति चरति । न जरामरणं शून्यमिति चरति । न जरामरणमशून्यमिति चरति । न जरामरणं निमित्तमिति चरति । न जरामरणमनिमित्तमिति चरति । न जरामरणं प्रणिहितमिति चरति । न जरामरण-मप्रणिहितमिति चरति । न जरामरणं विविक्तमिति चरति । न जरामरणमविविक्तमिति चरति ।

न दानपारमितायां चरति । न दानपारमितायाः निमित्ते चरति । न दानपारमिता नित्येति चरति । न दानपारमिता-ऽनित्येति चरति । न दानपारमिता सुखेति चरति । न दान-पारमिता दुःखेति चरति । न दानपारमिता आत्मेति चरति । न दानपारमिताऽनात्मेति चरति । न दानपारमिता शान्तेति चरति । न दानपारमिताऽशान्तेति चरति । न दानपारमिता शून्येति चरति । न दानपारमिताऽशून्येति चरति । न दानपार-मिता निमित्तेति चरति । न दानपारमिताऽनिमित्तेति चरति । न दानपारमिता प्रणिहितेति चरति । न दानपारमिताऽप्रणि-हितेति चरति । न दानपारमिता विविक्तेति चरति । न दान-पारमिताऽविविक्तेति चरति ।

न शीलपारमितायां चरति । न शीलपारमितायाः निमित्ते चरति । न शीलपारमिता नित्येति चरति । न शीलपारमिता-

ऽनित्येति चरति। न शीलपारमिता सुखेति चरति। न शील-पारमिता दुःखेति चरति। न शीलपारमिता आत्मेति चरति। न शीलपारमिताऽनात्मेति चरति। न शीलपारमिता शान्तेति चरति। न शीलपारमिताऽशान्तेति चरति। न शीलपारमिता शून्येति चरति। न शीलपारमिताऽशून्येति चरति। न शीलपार-मिता निमित्तेति चरति। न शीलपारमिताऽनिमित्तेति चरति। न शीलपारमिता प्रणिहितेति चरति। न शीलपारमिताऽप्रणि-हितेति चरति। न शीलपारमिता विविक्तेति चरति। न शील-पारमिताऽविविक्तेति चरति।

न क्षान्तिपारमितायां चरति। न क्षान्तिपारमितायाः निमित्ते चरति। न क्षान्तिपारमिता नित्येति चरति। न क्षान्तिपारमिता-ऽनित्येति चरति। न क्षान्तिपारमिता सुखेति चरति। न क्षान्ति-पारमिता दुःखेति चरति। न क्षान्तिपारमिता आत्मेति चरति। न क्षान्तिपारमिताऽनात्मेति चरति। न क्षान्तिपारमिता शान्तेति चरति। न क्षान्तिपारमिताऽशान्तेति चरति। न क्षान्तिपारमिता शून्येति चरति। न क्षान्तिपारमिताऽअशून्येति चरति। न क्षान्ति-पारमिता निमित्तेति चरति। न क्षान्तिपारमिताऽनिमित्तेति चरति। न क्षान्तिपारमिता प्रणिहितेति चरति। न क्षान्तिपार-मिताऽप्रणिहितेति चरति। न क्षान्तिपारमिता विविक्तेति चरति। न क्षान्तिपारमिताऽविविक्तेति चरति।

न वीर्य्यपारमितायां चरति। न वीर्य्यपारमितायाः निमित्ते चरति। न वीर्य्यपारमिता नित्येति चरति। न वीर्य्यपारमिता-

ऽनित्येति चरति। न वीर्य्यपारमिता सुखेति चरति। न वीर्य्यपारमिता दुःखेति चरति। न वीर्य्यपारमिता आत्मेति चरति। न वीर्य्यपारमिता अनात्मेति चरति। न वीर्य्यपारमिता शान्तेति चरति। न वीर्य्यपारमिताऽशान्तेति चरति। न वीर्य्यपारमिता शून्येति चरति। न वीर्य्यपारमिताऽशून्येति चरति। न वीर्य्यपारमिता निमित्तेति चरति। न वीर्य्यपारमिताऽनिमित्तेति चरति। न वीर्य्यपारमिता प्रणिहितेति चरति। न वीर्य्यपारमिताऽप्रणिहितेति चरति। न वीर्य्यपारमिता विविक्तेति चरति। न वीर्य्यपारमिताऽविविक्तेति चरति।

न ध्यानपारमितायां चरति। न ध्यानपारमितायाः निमित्ते चरति। न ध्यानपारमिता नित्येति चरति। न ध्यानपारमिताऽनित्येति चरति। न ध्यानपारमिता सुखेति चरति। न ध्यानपारमिता दुःखेति चरति। न ध्यानपारमिता आत्मेति चरति। न ध्यानपारमिता अनात्मेति चरति। न ध्यानपारमिता शान्तेति चरति। न ध्यानपारमिताऽशान्तेति चरति। न ध्यानपारमिता शून्येति चरति। न ध्यानपारमिताऽशून्येति चरति। न ध्यानपारमिता निमित्तेति चरति। न ध्यानपारमिताऽनिमित्तेति चरति। न ध्यानपारमिता प्रणिहितेति चरति। न ध्यानपारमिताऽप्रणिहितेति चरति। न ध्यानपारमिता विविक्तेति चरति। न ध्यानपारमिताऽविविक्तेति चरति।

न प्रज्ञापारमितायां चरति। न प्रज्ञापारमितायाः निमित्ते चरति। न प्रज्ञापारमिता नित्येति चरति। न प्रज्ञापारमिता-

ऽनित्येति चरति। न प्रज्ञापारमिता सुखेति चरति। न प्रज्ञापारमिता दुःखेति चरति। न प्रज्ञापारमिता आत्मेति चरति। न प्रज्ञापारमिताऽनात्मेति चरति। न प्रज्ञापारमिता शान्तेति चरति। न प्रज्ञापारमिताऽशान्तेति चरति। न प्रज्ञापारमिता शून्येति चरति। न प्रज्ञापारमिताऽशून्येति चरति। न प्रज्ञापारमिता निमित्ते चरति। न प्रज्ञापारमिताऽनिमित्ते चरति। न प्रज्ञापारमिता प्रणिहितेति चरति। न प्रज्ञापारमिताऽप्रणिहितेति चरति। न प्रज्ञापारमिता विविक्तेति चरति। न प्रज्ञापारमिताऽविविक्तेति चरति।

नाऽध्यात्मशून्यतायां चरति। नाऽध्यात्मशून्यतायाः निमित्ते चरति। नाऽध्यात्मशून्यता नित्येति चरति। नाऽध्यात्मशून्यताऽनित्येति चरति। नाऽध्यात्मशून्यता सुखेति चरति। नाऽध्यात्मशून्यता दुःखेति चरति। नाऽध्यात्मशून्यता आत्मेति चरति। नाऽध्यात्मशून्यताऽनात्मेति चरति। नाऽध्यात्मशून्यता शान्तेति चरति। नाऽध्यात्मशून्यताऽशान्तेति चरति। नाऽध्यात्मशून्यता शून्येति चरति। नाऽध्यात्मशून्यताऽशून्येति चरति। नाऽध्यात्मशून्यता निमित्तेति चरति। नाऽध्यात्मशून्यताऽनिमित्तेति चरति। नाऽध्यात्मशून्यता प्रणिहितेति चरति। नाऽध्यात्मशून्यताऽप्रणिहितेति चरति। नाऽध्यात्मशून्यता विविक्तेति चरति। नाऽध्यात्मशून्यताऽविविक्तेति चरति।

न वहिर्द्धाशून्यतायां चरति। न वहिर्द्धाशून्यतायाः निमित्ते चरति। न वहिर्द्धाशून्यता नित्येति चरति। न वहिर्द्धाशून्यता-

ऽनित्येति चरति। न वहिर्द्धाशून्यता सुखेति चरति। न वहिर्द्धाशून्यता दुःखेति चरति। न वहिर्द्धाशून्यता आत्मेति चरति। न वहिर्द्धाशून्यताऽनात्मेति चरति। न वहिर्द्धाशून्यता शान्तेति चरति। न वहिर्द्धाशून्यताऽशान्तेति चरति। न वहिर्द्धाशून्यताशून्येति चरति। न वहिर्द्धाशून्यताऽशून्येति चरति। न वहिर्द्धाशून्यता निमित्तेति चरति। न वहिर्द्धाशून्यताऽनिमित्तेति चरति। न वहिर्द्धाशून्यता प्रणिहितेति चरति। न वहिर्द्धाशून्यताऽप्रणिहितेति चरति। न वहिर्द्धाशून्यता विविक्तेति चरति। न वहिर्द्धाशून्यताऽविविक्तेति चरति।

नाऽध्यात्मवहिर्द्धाशून्यतायां चरति। नाऽध्यात्मवहिर्द्धाशून्यतायाः निमित्ते चरति। नाऽध्यात्मवहिर्द्धाशून्यता नित्येति चरति। नाऽध्यात्मवहिर्द्धाशून्यताऽनित्येति चरति। नाऽध्यात्मवहिर्द्धाशून्यता सुखेति चरति। नाऽध्यात्मवहिर्द्धाशून्यता दुःखेति चरति। नाऽध्यात्मवहिर्द्धाशून्यता आत्मेति चरति। नाऽध्यात्मवहिर्द्धाशून्यताऽनात्मेति चरति। नाऽध्यात्मवहिर्द्धाशून्यता शान्तेति चरति। नाऽध्यात्मवहिर्द्धाशून्यताऽशान्तेति चरति। नाऽध्यात्मवहिर्द्धाशून्यता शून्येति चरति। नाऽध्यात्मवहिर्द्धाशून्यताऽशून्येति चरति। नाऽध्यात्मवहिर्द्धाशून्यता निमित्तेति चरति। नाऽध्यात्मवहिर्द्धाशून्यताऽनिमित्तेति चरति। नाऽध्यात्मवहिर्द्धाशून्यता प्रणिहितेति चरति। नाऽध्यात्मवहिर्द्धाशून्यताऽप्रणिहितेति चरति। नाऽध्यात्मवहिर्द्धाशून्यता विविक्तेति चरति। नाध्यात्मवहिर्द्धाशून्यताऽविविक्तेति चरति।

न शून्यताशून्यतायां चरति । न शून्यताशून्यतायाः निमित्ते चरति । न शून्यताशून्यता नित्येति चरति । न शून्यताशून्यताऽनित्येति चरति । न शून्यताशून्यता सुखेति चरति । न शून्यताशून्यता दुःखेति चरति । न शून्यताशून्यता आत्मेति चरति । न शून्यताशून्यताऽनात्मेति चरति । न शून्यताशून्यता शान्तेति चरति । न शून्यताशून्यताऽशान्तेति चरति । न शून्यताशून्यता शून्येति चरति । न शून्यताशू-्यताऽशून्येति चरति । न शून्यताशून्यता निमित्तेति चरति । न शून्यताशून्यताऽनिमित्तेति चरति । न शून्यताशून्यता प्रणिहितेति चरति । न शून्यताशून्यताऽप्रणिहितेति चरति । न शून्यताशून्यता विविक्तेति चरति । न शून्यताशून्यताऽविविक्तेति चरति ।

न महाशून्यतायां चरति । न महाशून्यतायाः निमित्ते चरति । न महाशून्यता नित्येति चरति । न महाशून्यताऽनित्येति चरति । न महाशून्यता सुखेति चरति । न महाशून्यता दुःखेति चरति । न महाशून्यता आत्मेति चरति । न महाशून्यताऽनात्मेति चरति । न महाशून्यता शान्तेति चरति । न महाशून्यताऽशान्तेति चरति । न महाशून्यता शून्येति चरति । न महाशून्यताऽशून्येति चरति । न महाशून्यता निमित्तेति चरति । न महाशून्यताऽनिमित्तेति चरति । न महाशून्यता प्रणिहितेति चरति । न महाशून्यता ऽप्रणिहितेति चरति । न महाशून्यता विविक्तेति चरति । न महाशून्यताऽविविक्तेति चरति ।

न परमार्थशून्यतायां चरति । न परमार्थशून्यतायाः निमित्ते

चरति। न परमार्थशून्यता नित्येति चरति। न परमार्थशून्यता- ऽनित्येति चरति। न परमार्थशून्यता सुखेति चरति। न परमार्थ- शून्यता दुःखेति चरति। न परमार्थशून्यता आत्मेति चरति। न परमार्थशून्यता अनात्मेति चरति। न परमार्थशून्यता शान्तेति चरति। न परमार्थशून्यताऽशान्तेति चरति। न परमार्थशून्यता शून्येति चरति। न परमार्थशून्यताऽशून्येति चरति। न परमार्थ- शून्यता निमित्तेति चरति। न परमार्थशून्यताऽनिमित्तेति चरति। न परमार्थशून्यता प्रणिहितेति चरति। न परमार्थशून्यताऽप्रणि- हितेति चरति। न परमार्थशून्यता विविक्तेति चरति। न परमार्थ- शून्यताऽविविक्तेति चरति।

न संस्कृतशून्यतायां चरति। न संस्कृतशून्यतायाः निमित्ते चरति। न संस्कृतशून्यता नित्येति चरति। न संस्कृतशून्यताऽनि- त्येति चरति। न संस्कृतशून्यता सुखेति चरति। न संस्कृतशून्यता दुःखेति चरति। न संस्कृतशून्यता आत्मेति चरति। न संस्कृत- शून्यता अनात्मेति चरति। न संस्कृतशून्यना शान्तेति चरति। न संस्कृतशून्यताऽशान्तेति चरति। न संस्कृतशून्यता शून्येति चरति। न संस्कृतशून्यताऽशून्येति चरति। न संस्कृतशून्यता निमित्तेति चरति। न संस्कृतशून्यताऽनिमित्तेति चरति। न संस्कृतशून्यता प्रणिहितेति चरति। न संस्कृतशून्यताऽप्रणिहितेति चरति। न संस्कृतशून्यता विविक्तेति चरति। न संस्कृतशून्यता ऽविविक्तेति चरति।

नाऽसंस्कृतशून्यतायां चरति। नाऽसंस्कृतशून्यतायाः निमित्ते चरति। नाऽसंस्कृतशून्यता नित्येति चरति। नाऽसंस्कृतशून्यता-

ऽनित्येति चरति। नाऽसंस्कृतशून्यता सुखेति चरति। नाऽसंस्कृतशून्यता दुःखेति चरति। नाऽसंस्कृतशून्यता आत्मेति चरति। नाऽसंस्कृतशून्यता अनात्मेति चरति। नाऽसंस्कृतशून्यता शान्तेति चरति। नाऽसंस्कृतशून्यताऽशान्तेति चरति। नाऽसंस्कृतशून्यता शून्येति चरति। नाऽसंस्कृतशून्यताऽशून्येति चरति। नाऽसंस्कृतशून्यता निमित्तेति चरति। नाऽसंस्कृतशून्यताऽनिमित्तेति चरति। नाऽसंस्कृतशून्यता प्रणिहितेति चरति। नाऽसंस्कृतशून्यताऽप्रणिहितेति चरति। नाऽसंस्कृतशून्यता विविक्तेति चरति। नाऽसंस्कृतशून्यताऽविविक्तेति चरति।

नाऽत्यन्तशून्यतायां चरति। नाऽत्यन्तशून्यतायाः निमित्ते चरति। नाऽत्यन्तशून्यता नित्येति चरति। नाऽत्यन्तशून्यताऽनित्येति चरति। नाऽत्यन्तशून्यता सुखेति चरति। नाऽत्यन्तशून्यता दुःखेति चरति। नाऽत्यन्तशून्यता आत्मेति चरति। नात्यन्तशून्यता अनात्मेति चरति। नाऽत्यन्तशून्यता शान्तेति चरति। नाऽत्यन्तशून्यताऽशान्तेति चरति। नाऽत्यन्तशून्यता शून्येति चरति। नाऽत्यन्तशून्यताऽशून्येति चरति। नाऽत्यन्तशून्यता निमित्तेति चरति। नाऽत्यन्तशून्यताऽनिमित्तेति चरति। नाऽत्यन्तशून्यताप्रणिहितेति चरति। नाऽत्यन्तशून्यताऽप्रणिहितेति चरति। नाऽत्यन्तशून्यता विविक्तेति चरति। नाऽत्यन्तशून्यताऽविविक्तेति चरति।

नाऽनवराग्रशून्यतायां चरति। नाऽनवराग्रशून्यतायाः निमित्ते चरति। नाऽनवराग्रशून्यता नित्येति चरति। नाऽनवराग्रशून्यताऽनित्येति चरति। नाऽनवराग्रशून्यता सुखेति चरति। नाऽनवराग्र-

शून्यता दुःखेति चरति। नाऽनवराग्रशून्यता आत्मेति चरति। नाऽनवराग्रशून्यता अनात्मेति चरति। नाऽनवराग्रशून्यता शान्तेति चरति। नाऽनवराग्रशून्यताऽशान्तेति चरति। नाऽवराग्रशून्यता शून्येति चरति। नाऽनवराग्रशून्यताऽशून्येति चरति। नाऽनवराग्र-शून्यता निमित्तेति चरति। नाऽनवराग्रशून्यताऽनिमित्तेति चरति। नाऽनवराग्रशून्यता प्रणिहितेति चरति। नाऽनवराग्रशून्यताऽप्रणि-हितेति चरति। नाऽनवराग्रशून्यता विविक्तेति चरति। नाऽन-वराग्रशून्यताऽविविक्तेति चरति।

नाऽनवकारशून्यतायां चरति। नाऽनवकारशून्यतायाः निमित्ते चरति। नाऽनवकारशून्यता नित्येति चरति। नाऽनवकारशून्यता-ऽनित्येति चरति। नाऽनवकारशून्यता सुखेति चरति। नाऽनव-कारशून्यता दुःखेति चरति। नाऽनवकारशून्यता आत्मेति चरति। नाऽनवकारशून्यता अनात्मेति चरति। नाऽनवकारशून्यता शान्तेति चरति। नाऽनवकारशून्यताऽशान्तेति चरति। नाऽनवकारशून्यता शून्येति चरति। नाऽनवकारशून्यताऽशून्येति चरति। नाऽनवकार-शून्यता निमित्तेति चरति। नाऽनवकारशून्यताऽनिमित्तेति चरति। नाऽनवकारशून्यता प्रणिहितेति चरति। नाऽनवकारशून्यताऽप्रणि-हितेति चरति। नाऽनवकारशून्यता विविक्तेति चरति। नाऽनव-कारशून्यताऽविविक्तेति चरति।

न प्रकृतिशून्यतायां चरति। न प्रकृतिशून्यतायाः निमित्ते चरति। न प्रकृतिशून्यता नित्येति चरति। न प्रकृतिशून्यता-ऽनित्येति चरति। न प्रकृतिशून्यता सुखेति चरति। न प्रकृति-

शून्यता दुःखेति चरति। न प्रकृतिशून्यता आत्मेति चरति। न प्रकृतिशून्यता अनात्मेति चरति। न प्रकृतिशून्यता शान्तेति चरति। न प्रकृतिशून्यताऽशान्तेति चरति। न प्रकृतिशून्यता शून्येति चरति। न प्रकृतिशून्यताऽशून्येति चरति। न प्रकृतिशून्यता निमित्तेति चरति। न प्रकृतिशून्यताऽनिमित्तेति चरति। न प्रकृतिशून्यता प्रणिहितेति चरति। न प्रकृतिशून्यताऽप्रणिहितेति चरति। न प्रकृतिशून्यता विविक्तेति चरति। न प्रकृतिशून्यता-ऽविविक्तेति चरति।

न सर्व्वधर्म्मशून्यतायां चरति। न सर्व्वधर्म्मशून्यतायाः निमित्ते चरति। न सर्व्वधर्म्मशून्यता नित्येति चरति। न सर्व्वधर्म्मशून्यता-ऽनित्येति चरति। न सर्व्वधर्म्मशून्यता सुखेति चरति। न सर्व्व-धर्म्मशून्यता दुःखेति चरति। न सर्व्वधर्म्मशून्यता आत्मेति चरति। न सर्व्वधर्म्मशून्यता अनात्मेति चरति। न सर्व्वधर्म्मशून्यता शान्तेति चरति। न सर्व्वधर्म्मशून्यताऽशान्तेति चरति। न सर्व्वधर्म्मशून्यता शून्येति चरति। न सर्व्वधर्म्मशून्यताऽशून्येति चरति। न सर्व्वधर्म्म-शून्यता निमित्तेति चरति। न सर्व्वधर्म्मशून्यताऽनिमित्तेति चरति। न सर्व्वधर्म्मशून्यता प्रणिहितेति चरति। न सर्व्वधर्म्मशून्यताऽप्रणि-हितेति चरति। न सर्व्वधर्म्मशून्यता विविक्तेति चरति। न सर्व्व-धर्म्मशून्यताऽविविक्तेति चरति।

न स्वलक्षणशून्यतायां चरति। न स्वलक्षणशून्यतायाः निमित्ते चरति। न स्वलक्षणशून्यता नित्येति चरति। न स्वलक्षणशून्यता अनित्येति चरति। न स्वलक्षणशून्यता सुखेति चरति। न

स्वलक्षणशून्यता दुःखेति चरति । न स्वलक्षणशून्यता आत्मेति चरति । न स्वलक्षणशून्यता अनात्मेति चरति । न स्वलक्षणशून्यता शान्तेति चरति । न स्वलक्षणशून्यताऽशान्तेति चरति । न स्वलक्षणशून्यता शून्येति चरति । न स्वलक्षणशून्यताऽशून्येति चरति । न स्वलक्षणशून्यता निमित्तेति चरति । न स्वलक्षणशून्यताऽनिमित्तेति चरति । न स्वलक्षणशून्यता प्रणिहितेति चरति । न स्वलक्षशून्यताऽप्रणिहितेति चरति । न स्वलक्षणशून्यता विविक्तेति चरति । न स्वलक्षणशून्यताऽविविक्तेति चरति ।

नाऽनुपलम्भशून्यतायां चरति । नाऽनुपलम्भशून्यतायाः निमित्ते चरति । नाऽनुपलम्भशून्यता नित्येति चरति । नाऽनुपलम्भशून्यताऽनित्येति चरति । नाऽनुपलम्भशून्यता सुखेति चरति । नाऽनुपलम्भशून्यता दुःखेति चरति । नाऽनुपलम्भशून्यता आत्मेति चरति । नाऽनुपलम्भशून्यता अनात्मेति चरति । नाऽनुपलम्भशून्यता शान्तेति चरति । नाऽनुपलम्भशून्यताऽशान्तेति चरति । नाऽनुपलम्भशून्यता शून्येति चरति । नाऽनुपलम्भशून्यताऽशून्येति चरति । नाऽनुपलम्भशून्यता निमित्तेति चरति । नाऽनुपलम्भशून्यताऽनिमित्तेति चरति । नाऽनुपलम्भशून्यता प्रणिहितेति चरति । नाऽनुपलम्भशून्यताऽप्रणिहितेति चरति । नाऽनुपलम्भशून्यता विविक्तेति चरति । नाऽनुपलम्भशून्यताऽविविक्तेति चरति ।

नाऽभावशून्यतायां चरति । नाऽभावशून्यतायाः निमित्ते चरति । नाऽभावशून्यता नित्येति चरति । नाऽभावशून्यताऽनित्येति चरति । नाऽभावशून्यता सुखेति चरति । नाऽभावशून्यता दुःखेति चरति ।

नाऽभावशून्यता आत्मेति चरति। नाऽभावशून्यता अनात्मेति चरति। नाऽभावशून्यता शान्तेति चरति। नाऽभावशून्यताऽशान्तेति चरति। नाऽभावशून्यता शून्येति चरति। नाऽभावशून्यताऽशून्येति चरति। नाऽभावशून्यता निमित्तेति चरति। नाऽभावशून्यताऽनिमित्तेति चरति। नाऽभावशून्यता प्रणिहितेति चरति। नाऽभावशून्यता-ऽप्रणिहितेति चरति। नाऽभावशून्यता विविक्तेति चरति। नाऽभावशून्यताऽविविक्तेति चरति।

न स्वभावशून्यतायां चरति। न स्वभावशून्यतायाः निमित्ते चरति। न स्वभावशून्यता नित्येति चरति। न स्वभावशून्यता-ऽनित्येति चरति। न स्वभावशून्यता सुखेति चरति। न स्वभाव-शून्यता दुःखेति चरति। न स्वभावशून्यता आत्मेति चरति। न स्वभावशून्यता अनात्मेति चरति। न स्वभावशून्यता शान्तेति चरति। न स्वभावशून्यताऽशान्तेति चरति। न स्वभावशून्यता शून्येति चरति। न स्वभावशून्यताऽशून्येति चरति। न स्वभावशून्यता निमित्तेति चरति। न स्वभावशून्यताऽनिमित्तेति चरति। न स्वभावशून्यता प्रणिहितेति चरति। न स्वभावशून्यताऽप्रणि-हितेति चरति। न स्वभावशून्यता विविक्तेति चरति। न स्वभाव-शून्यताऽविविक्तेति चरति।

नाऽभावस्वभावशून्यतायां चरति। नाऽभावस्वभावशून्यतायाः निमित्ते चरति। नाऽभावस्वभावशून्यता नित्येति चरति। नाऽभावस्वभावशून्यताऽनित्येति चरति। नाऽभावस्वभावशून्यता सुखेति चरति। नाऽभावस्वभावशून्यता दुःखेति चरति। नाऽभाव-

स्वभावशून्यता आत्मेति चरति। नाऽभावस्वभावशून्यता अनात्मेति चरति। नाऽभावस्वभावशून्यता शान्तेति चरति। नाऽभावस्वभावशून्यताऽशान्तेति चरति। नाऽभावस्वभावशून्यता शून्येति चरति। नाऽभावस्वभावशून्यताऽशून्येति चरति। नाऽभावस्वभावशून्यता निमित्तेति चरति। नाऽभावस्वभावशून्यताऽनिमित्तेति चरति। नाऽभावस्वभावशून्यता प्रणिहितेति चरति। नाऽभावस्वभावशून्यताऽप्रणिहितेति चरति। नाऽभावस्वभावशून्यता विविक्तेति चरति। नाऽभावस्वभावशून्यताऽविविक्तेति चरति।

न स्मृत्युपस्थानेषु चरति। न स्मृत्युपस्थानानां निमित्ते चरति। न स्मृत्युपस्थानानि नित्यानीति चरति। न स्मृत्युपस्थानानि अनित्यानीति चरति। न स्मृत्युपस्थानानि सुखानीति चरति। न स्मृत्युपस्थानानि दुःखानीति चरति। न स्मृत्युपस्थानानि आत्मिकानीति चरति। न स्मृत्युपस्थानान्यनात्मिकानीति चरति। न स्मृत्युपस्थानानि शान्तानीति चरति। न स्मृत्युपस्थानान्यशान्तानीति चरति। न स्मृत्युपस्थानानि शून्यानीति चरति। न स्मृत्युपस्थानान्यशून्यानीति चरति। न स्मृत्युपस्थानानि निमित्तानीति चरति। न स्मृत्युस्थानान्यनिमित्तानीति चरति। न स्मृत्युपस्थानानि प्रणिहितानीति चरति। न स्मृत्युपस्थानान्यप्रणिहितानीति चरति। न स्मृत्युपस्थानानि विविक्तानीति चरति। न स्मृत्युपस्थानान्यविविक्तानीति चरति।

न सम्यक्प्रहाणेषु चरति। न सम्यक्प्रहाणानां निमित्ते चरति। न सम्यक्प्रहाणानि नित्यानीति चरति। न सम्यक्प्रहाणान्य-

नित्यानीति चरति। न सम्यक्प्रहाणानि सुखानीति चरति। न सम्यक्प्रहाणानि दुःखानीति चरति। न सम्यक्प्रहाणानि आत्मिकानीति चरति। न सम्यक्प्रहाणान्यनात्मिकानीति चरति। न सम्यक्प्रहाणानि शान्तानीति चरति। न सम्यक्प्रहाणान्यशान्तानीति चरति। न सम्यक्प्रहाणानि शून्यानीति चरति। न सम्यक्प्रहाणान्यशून्यानीति चरति। न सम्यक्प्रहाणानि निमित्तानीति चरति। न सम्यक्प्रहाणान्यनिमित्तानीति चरति। न सम्यक्प्रहाणानि प्रणिहितानीति चरति। न सम्यक्प्रहाणान्यप्रणिहितानीति चरति। न सम्यक्प्रहाणानि विविक्तानीति चरति। न सम्यक्प्रहाणान्यविविक्तानीति चरति।

न ऋद्धिपादेषु चरति। न ऋद्धिपादानां निमित्ते चरति। न ऋद्धिपादाः नित्या इति चरति। न ऋद्धिपादा अनित्या इति चरति। न ऋद्धिपादाः सुखा इति चरति। न ऋद्धिपादाः दुःखा इति चरति। न ऋद्धिपादा आत्मान इति चरति। न ऋद्धिपादा अनात्मान इति चरति। न ऋद्धिपादाः शान्ता इति चरति। न ऋद्धिपादा अशान्ता इति चरति। न ऋद्धिपादाः शून्या इति चरति। न ऋद्धिपादा अशून्या इति चरति। न ऋद्धिपादाः निमित्ता इति चरति। न ऋद्धिपादा अनिमित्ता इति चरति। न ऋद्धिपादाः प्रणिहिता इति चरति। न ऋद्धिपादा अप्रणिहिता इति चरति। न ऋद्धिपादाः विविक्ता इति चरति। न ऋद्धिपादा अविविक्ता इति चरति।

नेन्द्रियेषु चरति। नेन्द्रियाणां निमित्ते चरति। नेन्द्रियाणि

नित्यानीति चरति। नेन्द्रियाणि अनित्यानीति चरति। नेन्द्रियाणि सुखानीति चरति। नेन्द्रियाणि दुःखानीति चरति। नेन्द्रियाण्यात्मिकानीति चरति। नेन्द्रियाण्यनात्मिकानीति चरति। नेन्द्रियाणि शान्तानीति चरति। नेन्द्रियाण्यशान्तानीति चरति। नेन्द्रियाणि शून्यानीति चरति। नेन्द्रियाण्यशून्यानीति चरति। नेन्द्रियाणि निमित्तानीति चरति। नेन्द्रियाण्यनिमित्तानीति चरति। नेन्द्रियाणि प्रणिहितानीति चरति। नेन्द्रियाण्यप्रणिहितानीति चरति। नेन्द्रियाणि विविक्तानीति चरति। नेन्द्रियाण्यविविक्तानीति चरति।

न बलेषु चरति। न बलानां निमित्ते चरति। न बलानि नित्यानीति चरति। न बलान्यनित्यानीति चरति। न बलानि सुखानीति चरति। न बलानि दुःखानीति चरति। न बलानि आत्मिकानीति चरति। न बलान्यनात्मिकानीति चरति। न बलानि शान्तानीति चरति। न बलान्यशान्तानीति चरति। न बलानि शून्यानीति चरति। न बलान्यशून्यानीति चरति। न बलानि निमित्तानीति चरति। न बलान्यनिमित्तानीति चरति। न बलानि प्रणिहितानीति चरति। न बलान्यप्रणिहितानीति चरति। न बलानि विविक्तानीति चरति। न बलान्यविविक्तानीति चरति।

न बोध्यङ्गेषु चरति। न बोध्यङ्गानां निमित्ते चरति। न बोध्यङ्गानि नित्यानीति चरति। न बोध्यङ्गान्यनित्यानीति चरति। न बोध्यङ्गानि सुखानीति चरति। न बोध्यङ्गानि दुःखानीति चरति। न बोध्यङ्गान्यात्मिकानीति चरति। न बोध्यङ्गान्यना-

त्मिकानीति चरति। न बोध्यङ्गानि शान्तानीति चरति। न बोध्यङ्गान्यशान्तानीति चरति। न बोध्यङ्गानि शून्यानीति चरति। न बोध्यङ्गान्यशून्यानीति चरति। न बोध्यङ्गानि निमित्तानीति चरति। न बोध्यङ्गान्यनिमित्तानीति चरति। न बोध्यङ्गानि प्रणिहितानीति चरति। न बोध्यङ्गान्यप्रणिहितानीति चरति। न बोध्यङ्गानि विविक्तानीति चरति। न बोध्यङ्गान्यविविक्तानीति चरति।

नार्य्याऽष्टाङ्गमार्गे चरति। नार्य्याष्टाङ्गमार्गस्य निमित्ते चरति। नार्य्याष्टाङ्गमार्गो नित्य इति चरति। नार्य्याष्टाङ्गमार्गोऽनित्य इति चरति। नार्य्याष्टाङ्गमार्गः सुख इति चरति। नार्य्याष्टाङ्गमार्गो दुःख इति चरति। नार्य्याष्टाङ्गमार्गः आत्मेति चरति। नार्य्याष्टाङ्गमार्गः अनात्मेति चरति। नार्य्याष्टाङ्गमार्गः शान्त इति चरति। नार्य्याष्टाङ्गमार्गः अशान्त इति चरति। नार्य्याष्टाङ्गमार्गः शून्य इति चरति। नार्य्याष्टाङ्गमार्गः अशून्य इति चरति। नार्य्याष्टाङ्गमार्गः निमित्त इति चरति। नार्य्याष्टाङ्गमार्गोऽनिमित्त इति चरति। नार्य्याष्टाङ्गमार्गः प्रणिहित इति चरति। नार्य्याष्टाङ्गमार्गोऽप्रणिहित इति चरति। नार्य्याष्टाङ्गमार्गो विविक्त इति चरति। नार्य्याष्टाङ्गमार्गोऽविविक्त इति चरति।

नार्य्यसत्येषु चरति। नार्य्यसत्यानां निमित्ते चरति। नार्य्यसत्यानि नित्यानीति चरति। नार्य्यसत्यान्यनित्यानीति चरति। नार्य्यसत्यानि सुखानीति चरति। नार्य्यसत्यानि दुःखानीति चरति। नार्य्यसत्यानि आत्मिकानीति चरति। नार्य्यसत्यान्यनात्मिकानीति

चरति। नार्य्यसत्यानि शान्तानीति चरति। नार्य्यसत्यान्यशान्तानीति चरति। नार्य्यसत्यानि शून्यानीति चरति। नार्य्यसत्यान्यशून्यानीति चरति। नार्य्यसत्यानि निमित्तानीति चरति। नार्य्यसत्यान्यनिमित्तानीति चरति। नार्य्यसत्यानि प्रणिहितानीति चरति। नार्य्यसत्यान्यप्रणिहितानीति चरति। नार्य्यसत्यानि विविक्तानीति चरति। नार्य्यसत्यान्यविविक्तानीति चरति।

न ध्यानेषु चरति। न ध्यानानां निमित्ते चरति। न ध्यानानि नित्यानीति चरति। न ध्यानान्यनित्यानीति चरति। न ध्यानानि सुखानीति चरति। न ध्यानानि दुःखानीति चरति। न ध्यानानि आत्मिकानीति चरति। न ध्यानान्यनात्मिकानीति चरति। न ध्यानानि शान्तानीति चरति। न ध्यानान्यशान्तानीति चरति। न ध्यानानि शून्यानीति चरति। न ध्यानान्यशून्यानीति चरति। न ध्यानानि निमित्तानीति चरति। न ध्यानान्यनिमित्तानीति चरति। न ध्यानानि प्रणिहितानीति चरति। न ध्यानान्यप्रणिहितानीति चरति। न ध्यानानि विविक्तानीति चरति। न ध्यानान्यविविक्तानीति चरति।

नाऽप्रमाणेषु चरति। नाऽप्रमाणानां निमित्ते चरति। नाऽप्रमाणानि नित्यानीति चरति। नाऽप्रमाणान्यनित्यानीति चरति। नाऽप्रमाणानि सुखानीति चरति। नाऽप्रमाणानि दुःखानीति चरति। नाऽप्रमाणानि आत्मिकानीति चरति। नाऽप्रमाणान्यनात्मिकानीति चरति। नाऽप्रमाणानि शान्तानीति चरति। नाऽप्रमाणान्यशान्तानीति चरति। नाऽप्रमाणानि शून्यानीति

चरति। नाऽप्रमाणान्यशून्यानीति चरति। नाऽप्रमाणानि निमित्तानीति चरति। नाऽप्रमाणान्यनिमित्तानीति चरति। नाऽप्रमाणानि प्रणिहितानीति चरति। नाऽप्रमाणान्यप्रणिहितानीति चरति। नाऽप्रमाणानि विविक्तानीति चरति। नाऽप्रमाणान्यविविक्तानीति चरति।

नारूप्यसमापत्तिषु चरति। नारूप्यसमापत्तीनां निमित्ते चरति। नारूप्यसमापत्ती*र्नित्या इति चरति। नारूप्यसमापत्तीरनित्या इति चरति। नारूप्यसमापत्तीः सुखा इति चरति। नारूप्यसमापत्तीर्दुःखा इति चरति। नारूप्यसमापत्तीरात्मान इति चरति। नारूप्यसमापत्तीरनात्मान इति चरति। नारूप्यसमापत्तीः शान्ता इति चरति। नारूप्यसमापत्तीरशान्ता इति चरति। नारूप्यसमापत्तीः शून्या इति चरति। नारूप्यसमापत्तीरशून्या इति चरति। नारूप्यसमापत्तीर्निमित्ता इति चरति। नारूप्यसमापत्तीरनिमित्ता इति चरति। नारूप्यसमापत्तीः प्रणिहिता इति चरति। नारूप्यसमापत्तीरप्रणिहिता इति चरति। नारूप्यसमापत्तीर्व्विविक्ता इति चरति। नारूप्यसमापत्तीरविविक्ता इति चरति।

---

* पूर्व्वरूपादिषु क्वचित् द्वितीयान्तता क्वचित् प्रथमान्तता, आदर्श-पुस्तके दृष्टा मया तु सर्व्वत्र प्रथमान्ततालिखिता। आरूप्यसमापत्तीरारभ्य द्वितीयान्ततैरपश्चात् लिखितग्रन्थे दृश्यते। अतोमयापि तथैव लिखितम्।

न विमोक्षेषु चरति। न विमोक्षाणां निमित्ते* चरति। न विमोक्षाः नित्या इति चरति। न विमोक्षान् अनित्या इति चरति। न विमोक्षान् सुखा इति चरति। न विमोक्षान् दुःखा इति चरति। न विमोक्षानात्मान इति चरति। न विमोक्षाननात्मान इति चरति। न विमोक्षान् शान्ता इति चरति। न विमोक्षानशान्ता इति चरति। न विमोक्षान् शून्या इति चरनि। न विमोक्षानशून्या इति चरति। न विमोक्षान् निमित्ता इति चरति। न विमोक्षाननिमित्ता इति चरति। न विमोक्षान् प्रणिहिता इति चरति। न विमोक्षानप्रणिहितानिति चरति। न विमोक्षान् विविक्ता इति चरति। न विमोक्षानविविक्ता इति चरति।

नाऽनुपूर्व्वविहारसमापत्तिषु चरति। नाऽनुपूर्व्वविहारसमापत्तीनां निमित्ते चरति। नाऽनुपूर्व्वविहारसमापत्तीर्नित्या इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरनित्या इति चरति। नाऽनुपूर्व्वविहारसमापत्तीः सुखा इति चरति। नाऽनुपूर्व्वविहारसमापत्तीर्दुःखा इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरात्मान इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरनात्मान इति चरति। नाऽनुपूर्व्वविहारसमापत्तीः शान्ता इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरशान्ता इति चरति। नाऽनुपूर्व्वविहारसमापत्तीः शून्या इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरशून्या इति चरति। नाऽनुपूर्व्वविहारसमापत्तीर्निमित्ता इति चरति। नाऽनुपूर्व्वविहार-

* क आदर्शपुस्तके धर्म्मे इति लिखितम्।

समापत्तीरनिमित्ता इति चरति। नाऽनुपूर्व्वविहारसमापत्तीः प्रणिहिता इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरप्रणिहिता इति चरति। नाऽनुपूर्व्वविहारसमापत्तीर्व्विविक्ता इति चरति। नाऽनुपूर्व्वविहारसमापत्तीरविविक्ता इति चरति।

न शून्यतानिमित्ताप्रणिहितविमोक्षमुखेषु चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानां निमित्ते चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि नित्यानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यनित्यानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि सुखानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि दुःखानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यात्मिकानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यनात्मिकानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि शान्तानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यशान्तानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि शून्यानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यशून्यानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि निमित्तानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यनिमित्तानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि प्रणिहितानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यप्रणिहितानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखानि विविक्तानीति चरति। न शून्यतानिमित्ताप्रणिहितविमोक्षमुखान्यविविक्तानीति चरति।

नाऽभिज्ञासु चरति । नाऽभिज्ञानां निमित्ते चरति । नाऽभिज्ञाः नित्या इति चरति । नाऽभिज्ञाः अनित्या इति चरति । नाऽभिज्ञाः सुखा इति चरति । नाऽभिज्ञाः दुःखा इति चरति । नाऽभिज्ञाः आत्मान इति चरति । नाऽभिज्ञाः अनात्मान इति चरति । नाऽभिज्ञाः शान्ता इति चरति । नाऽभिज्ञाः अशान्ता इति चरति । नाऽभिज्ञाः शून्या इति चरति । नाऽभिज्ञाः अशून्या इति चरति । नाऽभिज्ञाः निमित्ता इति चरति । नाऽभिज्ञाः अनिमित्ता इति चरति । नाऽभिज्ञाः प्रणिहिता इति चरति । नाऽभिज्ञाः अप्रणिहिता इति चरति । नाऽभिज्ञाः विविक्ता इति चरति । नाऽभिज्ञाः अविविक्ता इति चरति ।

न समाधिषु चरति । न समाधिनां चरति । न समाधीन्नित्या इति चरति । न समाधीननित्या इति चरति । न समाधीन् सुखा इति चरति । न समाधीन् दुःखा इति चरति । न समाधीनात्मान इति चरति । न समाधीननात्मान इति चरति । न समाधीन् शान्ता इति चरति । न समाधीनशान्ता इति चरति । न समाधीन् शून्या इति चरति । न समाधीनशून्या इति चरति । न समाधीन्निमित्ता इति चरति । न समाधीननिमित्ता इति चरति । न समाधीन् प्रणिहिता इति चरति । न समाधीन-प्रणिहिता इति चरति । न समाधीन् विविक्ता इति चरति । न समाधीनविविक्ता इति चरति ।

न धारणीमुखेषु चरति । न धारणीमुखानां निमित्ते चरति । न धारणीमुखानि नित्यानीति चरति । न धारणीमुखान्यनित्या-

नीति चरति। न धारणीमुखानि सुखानीति चरति। न धारणीमुखानि दुःखानीति चरति। न धारणीमुखान्यात्मिकानीति चरति। न धारणीमुखान्यनात्मिकानीति चरति। न धारणीमुखानि शान्तानीति चरति। न धारणीमुखान्यशान्तानीति चरति। न धारणीमुखानि शून्यानीति चरति। न धारणीमुखान्यशून्यानीति चरति। न धारणीमुखानि निमित्तानीति चरति। न धारणीमुखान्यनिमित्तानीति चरति। न धारणीमुखानि प्रणिहितानीति चरति। न धारणीमुखान्यप्रणिहितानीति चरति। न धारणीमुखानि विविक्तानीति चरति। न धारणीमुखान्यविविक्तानीति चरति।

न तथागतबलेषु चरति। न तथागतबलानां निमित्ते चरति। न तथागतबलानि नित्यानीति चरति। न तथागतबलान्यनित्यानीति चरति। न तथागतबलानि सुखानीति चरति। न तथागतबलानि दुःखानीति चरति। न तथागतबलान्यात्मिकानीति चरति। न तथागतबलान्यनात्मिकानीति चरति। न तथागतबलानि शान्तानीति चरति। न तथागतबलान्यशान्तानीति चरति। न तथागतबलानि शून्यानीति चरति। न तथागतबलान्यशून्यानीति चरति। न तथागतबलानि निमित्तानीति चरति। न तथागतबलान्यनिमित्तानीति चरति। न तथागतबलानि प्रणिहितानीति चरति। न तथागतबलान्यप्रणिहितानीति चरति। तथागतबलानि विविक्तानीति चरति। न तथागतबलान्यविविक्तानीति चरति।

न वैशारद्येषु चरति। न वैशारद्यानां निमित्ते चरति। न वैशारद्यानि नित्यानीति चरति। न वैशारद्यान्यनित्यानीति चरति। न वैशारद्यानि सुखानीति चरति। न वैशारद्यानि दुःखानीति चरति। न वैशारद्यान्यात्मिकानीति चरति। न वैशारद्यान्यनात्मिकानीति चरति। न वैशारद्यानि शान्तानीति चरति। न वैशारद्यान्यशान्तानीति चरति। न वैशारद्यानि शून्यानीति चरति। न वैशारद्यान्यशून्यानीति चरति। न वैशारद्यानि निमित्तानीति चरति। न वैशारद्यान्यनिमित्तानीति चरति। न वैशारद्यानि प्रणिहितानीति चरति। न वैशारद्यान्यप्रणिहितानीति चरति। न वैशारद्यानि विविक्तानीति चरति। न वैशारद्यान्यविविक्तानीति चरति।

न प्रतिसम्वित्सु चरति। न प्रतिसम्विदां निमित्ते चरति। न प्रतिसम्विदो नित्या इति चरति। न प्रतिसम्विदोऽनित्या इति चरति। न प्रतिसम्विदः सुखा इति चरति। न प्रतिसम्विदा दुःखा इति चरति। न प्रतिसम्विदः आत्मान इति चरति। न प्रतिसम्विदोऽनात्मान इति चरति। न प्रतिसम्विदः शान्ता इति चरति। न प्रतिसम्विदोऽशान्ता इति चरति। न प्रतिसम्विदः शून्या इति चरति। न प्रतिसम्विदोऽशून्या इति चरति। न प्रतिसम्विदो निमित्ता इति चरति। न प्रतिसम्विदोऽनिमित्ता इति चरति। न प्रतिसम्विदो प्रणिहिता इति चरति। न प्रतिसम्विदोऽप्रणिहिता इति चरति। न प्रतिसम्विदो विविक्ता इति चरति। न प्रतिसम्विदोऽविविक्ता इति चरति।

न महाकरुणायां चरति। न महाकरुणाया निमित्ते चरति। न महाकरुणा नित्येति चरति। न महाकरुणाऽनित्येति चरति। न महाकरुणा सुखेति चरति। न महाकरुणा दुःखेति चरति। न महाकरुणा आत्मेति चरति। न महाकरुणाऽनात्मेति चरति। न महाकरुणा शान्तेति चरति। न महाकरुणाऽशान्तेति चरति। न महाकरुणा शून्येति चरति। न महाकरुणाऽशून्येति चरति। न महाकरुणा निमित्तेति चरति। न महाकरुणाऽनिमित्तेति चरति। न महाकरुणा प्रणिहितेति चरति। न महाकरुणाऽप्रणिहितेति चरति। न महाकरुणा विविक्तेति चरति। न महाकरुणा-ऽविविक्तेति चरति।

नाष्टादशावेणिकबुद्धधर्म्मेषु चरति। नाष्टादशावेणिकबुद्धधर्म्माणां निमित्ते चरति। नाष्टादशावेणिकबुद्धधर्म्मान्नित्या इति चरति। नाष्टादशावेणिकबुद्धधर्म्माननित्या इति चरति। नाष्टादशावेणिक-बुद्धधर्म्मान् सुखा इति चरति। नाष्टादशावेणिकबुद्धधर्म्मान् दुःखा इति चरति। नाष्टादशावेणिकबुद्धधर्म्मानात्मान इति चरति। नाष्टादशावेणिकबुद्धधर्म्माननात्मान इति चरति। नाष्टादशावेणिक-बुद्धधर्म्मान् शान्ता इति चरति। नाष्टादशावेणिकबुद्धधर्म्मानशान्ता इति चरति। नाष्टादशावेणिकबुद्धर्म्मान् शून्या इति चरति। नाष्टादशावेणिबुद्धधर्म्मानशून्या इति चरति। नाष्टादशावेणिक-बुद्धधर्म्मान्निमित्ता इति चरति। नाष्टादशावेणिकबुद्धधर्म्मान-निमित्ता इति चरति। नाष्टादशावेणिकबुद्धधर्म्मान् प्रणिहिता इति चरति। नाष्टादशावेणिकबुद्धधर्म्मानप्रणिहिता इति चरति।

नाष्टादशावेणिकबुद्धधर्म्मान् विविक्ता इति चरति। नाष्टादशावेणिकबुद्धधर्म्मानविविक्ता इति चरति।

तत्कस्य हेतोस्तथाह्यायुष्मञ्छारद्वतीपुत्र या रूपस्य शून्यता न तद्रूपं। न चाऽन्यत्र शून्यताया रूपं नाऽन्यत्र रूपाच्छून्यता। शून्यतैव रूपं। रूपमेव शून्यता। या वेदनायाः शून्यता न सा वेदना न चाऽन्यत्र शून्यताया वेदना नाऽन्यत्र वेदनायाः शून्यता। शून्यतैव वेदना। वेदनैव शून्यता। या संज्ञायाः शून्यता न सा शून्यता। न चाऽन्यत्र शून्यतायाः संज्ञा। नाऽन्यत्र संज्ञायाः शून्यता। शून्यतैव संज्ञा। संज्ञैव शून्यता। या संस्काराणां शून्यता न ते संस्काराः। न चाऽन्यत्र शून्यतायाः संस्काराः। नाऽन्यत्र संस्कारेभ्यः शून्यता। शून्यतैव संस्काराः। संस्कारा एव शून्यता। या विज्ञानस्य शून्यता न तद्विज्ञानं। न चाऽन्यत्र शून्यतायाः विज्ञानं। नाऽन्यत्र विज्ञानाच्छून्यता। शून्यतैव विज्ञानं। विज्ञानमेव शून्यता।

या चक्षुषः शून्यता न तच्चक्षुः। न चाऽन्यत्र शून्यतायाश्चक्षुः। नाऽन्यत्र चक्षुषः शून्यता। शून्यतैव चक्षुः। चक्षुरेव शून्यता। या श्रोत्रस्य शून्यता न तत् श्रोत्रं। न चाऽन्यत्र शून्यतायाः श्रोत्रं। नाऽन्यत्र श्रोत्राच्छून्यता। शून्यतैव श्रोत्रं। श्रोत्रमेव शून्यता। या घ्राणस्य शून्यता न तद्घ्राणं। न चाऽन्यत्र शून्यतायाः घ्राणं। नाऽन्यत्र घ्राणाच्छून्यता। शून्यतैव घ्राणं। घ्राणमेव शून्यता। या जिह्वायाः शून्यता न सा जिह्वा। न चाऽन्यत्र शून्यतायाः जिह्वा। नाऽन्यत्र जिह्वायाः शून्यता। शून्यतैव जिह्वा। जिह्वैव शून्यता। या कायस्य शून्यता न स कायः। न चाऽन्यत्र शून्यतायाः कायः।

नाऽन्यत्र कायाच्छून्यता । शून्यतैव कायः । काय एव शून्यता । या मनसः शून्यता न तन्मनः । न चाऽन्यत्र शून्यतायाः मनः । नाऽन्यत्र मनसः शून्यता । शून्यतैव मनः । मन एव शून्यता ।

या रूपस्य शून्यता न तद्रूपं । न चाऽन्यत्र शून्यतायाः रूपं । नाऽन्यत्र रूपाच्छून्यता । शून्यतैव रूपं । रूपमेव शून्यता । या शब्दस्य शून्यता न स शब्दः । न चाऽन्यत्र शून्यतायाः शब्दः । नाऽन्यत्र शब्दाच्छून्यता । शून्यतैव शब्दः । शब्द एव शून्यता । या गन्धस्य शून्यता न स गन्धः । न चाऽन्यत्र शून्यतायाः गन्धः । नाऽन्यत्र गन्धाच्छून्यता । शून्यतैव गन्धो गन्ध एव शून्यता । या रसस्य शून्यता न स रसः । न चाऽन्यत्र शून्यताया रसोनाऽन्यत्र रसाच्छून्यता । शून्यतैव रसोरस एव शून्यता । या स्पर्शस्य शून्यता न स स्पर्शः । न चाऽन्यत्र शून्यतायाः स्पर्शो नाऽन्यत्र स्पर्शाच्छून्यता । शून्यतैव स्पर्शः । स्पर्श एव शून्यता । या धर्म्माणां शून्यता न ते धर्म्माः । न चाऽन्यत्र शून्यतायाः धर्म्माः । नाऽन्यत्र धर्म्मेभ्यः शून्यता । शून्यतैव धर्म्माः । धर्म्मा एव शून्यता ।

या चक्षुर्धातुशून्यता न स चक्षुर्धातुः । न चाऽन्यत्र शून्यताया-श्चक्षुर्धातुर्नाऽन्यत्र चक्षुर्धातोः शून्यता । शून्यतैव चक्षुर्धातुश्चक्षुर्धातुरेव शून्यता । या रूपधातु शून्यता न स रूपधातुः । न चाऽन्यत्र शून्यतायाः रूपधातुः । नाऽन्यत्र रूपधातोः शून्यता । शून्यतैव रूपधातुः । रूपधातुरेव शून्यता । या चक्षुर्व्विज्ञानधातु शून्यता न स चक्षुर्व्विज्ञानधातुः । न चाऽन्यत्र शून्यतायाश्चक्षुर्व्विज्ञानधातुः । नाऽन्यत्र चक्षुर्व्विज्ञानधातोः शून्यता । शून्यतैव चक्षुर्व्विज्ञानधातुः ।

चक्षुर्विज्ञानधातुरेव शून्यता । या श्रोत्रधातु शून्यता न स श्रोत्र-
धातुः । न चाऽन्यत्र शून्यतायाः श्रोत्रधातुः । नाऽन्यत्र श्रोत्रधातोः
शून्यता । शून्यतैव श्रोत्रधातुः । श्रोत्रधातुरेव शून्यता । या शब्द-
धातुशून्यता न स शब्दधातुः । न चाऽन्यत्र शून्यतायाः शब्दधातुः ।
नाऽन्यत्र शब्दधातोः शून्यता । शून्यतैव शब्दधातुः । शब्दधातुरेव
शून्यता । या श्रोत्रविज्ञानधातु शून्यता । न स श्रोत्रविज्ञान-
धातुः । न चाऽन्यत्र शून्यतायाः श्रोत्रविज्ञानधातुः । नाऽन्यत्र
श्रोत्रविज्ञानधातोः शून्यता । शून्यतैव श्रोत्रविज्ञानधातुः ।
श्रोत्रविज्ञानधातुरेव शून्यता । या घ्राणधातुशून्यता न स घ्राण-
धातुः । न चाऽन्यत्र शून्यतायाः घ्राणधातुः । नाऽन्यत्र घ्राणधातोः
शून्यता । शून्यतैव घ्राणधातुः । घ्राणधातुरेव शून्यता । या गन्धधातु
शून्यता न स गन्धधातुः । न चाऽन्यत्र शून्यतायाः गन्धधातुः ।
नाऽन्यत्र गन्धधातोः शून्यता । शून्यतैव गन्धधातुः । गन्धधातुरेव
शून्यता । या घ्राणविज्ञानधातु शून्यता । न स घ्राणविज्ञानधातुः ।
न चाऽन्यत्र शून्यतायाः घ्राणविज्ञानधातुः । नाऽन्यत्र घ्राणविज्ञान-
धातोः शून्यता । शून्यतैव घ्राणविज्ञानधातुः । घ्राणविज्ञानधातुरेव
शून्यता । या जिह्वाधातुशून्यता न स जिह्वाधातुः । न चाऽन्यत्र
शून्यतायाः जिह्वाधातुः । नाऽन्यत्र जिह्वाधातोः शून्यता । शून्यतैव
जिह्वाधातुः । जिह्वाधातुरेव शून्यता । या रसधातु शून्यता । न स
रसधातुः । न चाऽन्यत्र शून्यतायाः रसधातुः । नाऽन्यत्र रसधातोः
शून्यता । शून्यतैव रसधातुः । रसधातुरेव शून्यता । या जिह्वा-
विज्ञानधातुशून्यता न स जिह्वाविज्ञानधातुः । न चाऽन्यत्र शून्यतायाः

जिह्वाविज्ञानधातुः। नाऽन्यत्र जिह्वाविज्ञानधातोः शून्यता। शून्यतैव जिह्वाविज्ञानधातुः। जिह्वाविज्ञानधातुरेव शून्यता। या कायधातुशून्यता न स कायधातुः। न चाऽन्यत्र शून्यतायाः कायधातुः। नाऽन्यत्र कायधातोः शून्यता। शून्यतैव कायधातुः। कायधातुरेव शून्यता। या स्पर्शधातु शून्यता न स स्पर्शधातुः। न चाऽन्यत्र शून्यतायाः स्पर्शधातुः। नाऽन्यत्र स्पर्शधातोः शून्यता। शून्यतैव स्पर्शधातुः। स्पर्शधातुरेवशून्यता।

या कायविज्ञानधातुशून्यता न स कायविज्ञानधातुः। न चाऽन्यत्र शून्यतायाः कायविज्ञानधातुः। नाऽन्यत्र कायविज्ञानधातोः शून्यता। शून्यतैव कायविज्ञालधातुः। कायविज्ञानधातुरेव शून्यता। या मनोधातु शून्यता न स मनोधातुः। न चाऽन्यत्र शून्यतायाः मनोधातुः। नाऽन्यत्र मनोधातोः शून्यता। शून्यतैव मनोधातुः। मनोधातुरेव शून्यता। या धर्म्मधातुशून्यता न स धर्म्मधातुः। न चाऽन्यत्र शून्यतायाः धर्म्मधातुः। नाऽन्यत्र धर्म्मधातोः शून्यता। शून्यतैव धर्म्मधातुः। धर्म्मधातुरेव शून्यता। या मनोविज्ञानधातुशून्यता न स मनोविज्ञानधातुः। न चाऽन्यत्र शून्यतायाः मनोविज्ञानधातुः। नाऽन्यत्र मनोविज्ञानधातोः शून्यता। शून्यतैव मनोविज्ञानधातुः। मनोविज्ञानधातुरेव शून्यता।

या पृथिवीधातुशून्यता न स पृथिवीधातुः। न चाऽन्यत्र शून्यतायाः पृथिवीधातुः। नाऽन्यत्र पृथिवीधातोः शून्यता। शून्यतैव पृथिवीधातुः। पृथिवीधातुरेव शून्यता। या ऽब्धातु शून्यता न साऽब्धातुः। न चाऽन्यत्र शून्यताया अब्धातुः। नाऽन्यत्राऽब्धातोः

शून्यता। शून्यतैवाऽब्धातुः। अब्धातुरेव शून्यता। या तेजोधातु शून्यता न स तेजोधातुः। न चाऽन्यत्र शून्यतायास्तेजोधातुः। नाऽन्यत्र तेजोधातोः शून्यता। शून्यतैव तेजोधातुः। तेजोधातुरेव शून्यता। या वायुधातुशून्यता न स वायुधातुः। न चाऽन्यत्र शून्यतायाः वायुधातुः। नाऽन्यत्र वायुधातोः शून्यता। शून्यतैव वायुधातुः। वायुधातुरेव शून्यता। या आकाशधातु शून्यता न स आकाश-धातुः। न चाऽन्यत्र शून्यताया आकाशधातुः। नाऽन्यत्राऽऽकाशधातोः शून्यता। शून्यतैवाऽऽकाशधातुः। आकाशधातुरेव शून्यता।

या विज्ञानधातु शून्यता न स विज्ञानधातुः। न चाऽन्यत्र शून्यतायाः विज्ञानधातुः। नाऽन्यत्र विज्ञानधातोः शून्यता। शून्यतैव विज्ञानधातुः। विज्ञानधातुरेव शून्यता। या ऽविद्याशून्यता न सा ऽविद्या। न चाऽन्यत्र शून्यताया अविद्या। नाऽन्यत्राऽविद्यायाः शून्यता। शून्यतैवाऽविद्या। अविद्यैव शून्यता। या संस्कारशून्यता न ते संस्काराः। न चाऽन्यत्र शून्यतायाः संस्काराः। नाऽन्यत्र संस्कारेभ्यः शून्यता। शून्यतैव संस्काराः। संस्कारा एव शून्यता। या विज्ञानशून्यता न तद्विज्ञानं। न चाऽन्यत्र शून्यतायाः विज्ञानं। नाऽन्यत्र विज्ञानाच्छून्यता। शून्यतैव विज्ञानं। विज्ञानमेव शून्यता।

या नामरूपशून्यता न तन्नामरूपं। न चाऽन्यत्र शून्यतायाः नामरूपं। नाऽन्यत्र नामरूपाच्छून्यता। शून्यतैव नामरूपं। नामरूपमेव शून्यता। या षड़ायतनशून्यता न तत्षड़ायतनं। न चाऽन्यत्र शून्यतायाः षड़ायतनं। नाऽन्यत्र षड़ायतनाच्छून्यता। शून्यतैव षड़ायतनं। षड़ायतनमेव शून्यता। या स्पर्श शून्यता न स

स्पर्शः। न चाऽन्यत्र शून्यतायाः स्पर्शः। नाऽन्यत्र स्पर्शाच्छून्यता। शून्यतैव स्पर्शः। स्पर्श एव शून्यता। *या वेदना शून्यता न सा वेदना। न चाऽन्यत्र शून्यतायाः वेदना। नाऽन्यत्र वेदनायाः शून्यता। शून्यतैव वेदना। वेदनैव शून्यता। या तृष्णा शून्यता न सा तृष्णा। न चाऽन्यत्र शून्यतायास्तृष्णा। नाऽन्यत्र तृष्णायाः शून्यता। शून्यतैव तृष्णा। तृष्णैव शून्यता। या उपादानशून्यता न तदुपादानं। न चाऽन्यत्र शून्यताया उपादानं। नाऽन्यत्रो-पादानाच्छून्यता। शून्यतैवोपादानं। उपादानमेव शून्यता। या भवशून्यता न स भवः। न चाऽन्यत्र शून्यतायाः भवः। नाऽन्यत्र भवाच्छून्यता। शून्यतैव भवः। भव एव शून्यता। या जाति शून्यता न सा जातिः। न चाऽन्यत्र शून्यतायाः जातिः। नाऽन्यत्र जातेः शून्यता। शून्यतैव जातिः। जातिरेव शून्यता। या जरामरणशून्यता न तज्जरामरणं। न चाऽन्यत्र शून्यतायाः जरामरणं। नाऽन्यत्र जरामरणाच्छून्यता। शून्यतैव जरामरणं। जरामरणमेव शून्यता।

या दानपारमिता शून्यता न सा दानपारमिता। न चाऽन्यत्र शून्यतायाः दानपारमिता। नाऽन्यत्र दानपारमितायाः शून्यता। शून्यतैव दानपारमिता। दानपारमितैव शून्यता। या शीलपार-मितायाः शून्यता न सा शीलपारमिता। न चाऽन्यत्र शून्यतायाः शीलपारमिता। नाऽन्यत्र शीलपारमितायाः शून्यता। शून्यतैव

---

* क, ग, पुस्तकेषु पाठः।

शीलपारमिता। शीलपारमितैव शून्यता। या क्षान्तिपारमिता शून्यता न सा क्षान्तिपारमिता। न चाऽन्यत्र शून्यतायाः क्षान्तिपारमिता। नाऽन्यत्र क्षान्तिपारमितायाः शून्यता। शून्यतैव क्षान्तिपारमिता। क्षान्तिपारमितैव शून्यता। या वीर्य्यपारमिता शून्यता न सा वीर्य्यपारमिता। न चाऽन्यत्र शून्यतायाः वीर्य्यपारमिता। नाऽन्यत्र वीर्य्यपारमितायाः शून्यता। शून्यतैव वीर्य्यपारमिता। वीर्य्यपारमितैव शून्यता। या ध्यानपारमिता शून्यता न सा ध्यानपारमिता। न चाऽन्यत्र शून्यतायाः ध्यानपारमिता। नाऽन्यत्र ध्यानपारमितायाः शून्यता। शून्यतैव ध्यानपारमिता। ध्यानपारमितैव शून्यता। या प्रज्ञापारमिता शून्यता न सा प्रज्ञापारमिता। न चाऽन्यत्र शून्यतायाः प्रज्ञापारमिता। नाऽन्यत्र प्रज्ञापारमितायाः शून्यता। शून्यतैव प्रज्ञापारमिता। प्रज्ञापारमितैव शून्यता।

या अध्यात्मशून्यतायाः शून्यता न सा अध्यात्मशून्यता। न चाऽन्यत्र शून्यताया अध्यात्मशून्यता। नाऽन्यत्राध्यात्मशून्यतायाः शून्यता। शून्यतैवाऽध्यात्मशून्यता। अध्यात्मशून्यतैव शून्यता। या बहिर्द्धाशून्यतायाः शून्यता न सा बहिर्द्धाशून्यता। न चाऽन्यत्र शून्यतायाः बहिर्द्धाशून्यता। नाऽन्यत्र बहिर्द्धाशून्यतायाः शून्यता। शून्यतैव बहिर्द्धाशून्यता। बहिर्द्धाशून्यतैव शून्यता। या अध्यात्मबहिर्द्धाशून्यतायाः शून्यता न सा अध्यात्मबहिर्द्धाशून्यता। न चाऽन्यत्र शून्यताया अध्यात्मबहिर्द्धाशून्यता। नाऽन्यत्राऽध्यात्मबहिर्द्धाशून्यतायाः शून्यता। शून्यतैवाऽध्यात्मबहिर्द्धाशून्यता।

अध्यात्मबहिर्द्धाशून्यतैव शून्यता । या शून्यताशून्यतायाः शून्यता न सा शून्यताशून्यता । न चाऽन्यत्र शून्यतायाः शून्यताशून्यता । नाऽन्यत्र शून्यता शून्यतायाः शून्यता । शून्यतेव शून्यताशून्यता । शून्यताशून्यतैव शून्यता । या महाशून्यतायाः शून्यता न सा महाशून्यता । न चाऽन्यत्र शून्यतायाः महाशून्यता । नाऽन्यत्र महाशून्यतायाः शून्यता । शून्यतैव महाशून्यता । महाशून्यतैव शून्यता । या परमार्थशून्यतायाः शून्यता न सा परमार्थशून्यता । न चाऽन्यत्र शून्यतायाः परमार्थशून्यता । नाऽन्यत्र परमार्थशून्यतायाः शून्यता । शून्यतैव परमार्थशून्यता । परमार्थशून्यतैव शून्यता । या संस्कृतशून्यतायाः शून्यता । न सा संस्कृतशून्यता । न चाऽन्यत्र शून्यतायाः संस्कृतशून्यता । नाऽन्यत्र संस्कृतशून्यतायाः शून्यता । शून्यतैव संस्कृतशून्यता । संस्कृतशून्यतैव शून्यता । या असंस्कृत-शून्यतायाः शून्यता न सा असंस्कृतशून्यता । न चाऽन्यत्र शून्यताया असंस्कृतशून्यता । नाऽन्यत्राऽसंस्कृतशून्यतायाः शून्यता । शून्यतैवा-ऽसंस्कृतशून्यता । असंस्कृतशून्यतैव शून्यता । या अत्यन्तशून्यतायाः शून्यता । न सा अत्यन्तशून्यता । न चाऽन्यत्र शून्यतायाः अत्यन्त-शून्यता । नाऽन्यत्राऽत्यन्तशून्यतायाः शून्यता । शून्यतैवाऽत्यन्तशून्यता । अत्यन्तशून्यतैव शून्यता । याऽनवराग्रशून्यतायाः शून्यता । न साऽनवराग्रशून्यता । न चाऽन्यत्र शून्यताया अनवराग्रशून्यता । नाऽन्यत्राऽनवराग्रशून्यतायाः शून्यता । शून्यतैवाऽनवराग्रशून्यता । या ऽनवकारशून्यतायाः शून्यता । न सा ऽनवकार शून्यता । न चाऽन्यत्र शून्यताया अनवकार शून्यता । नाऽन्यत्राऽनवकार-

शून्यतायाः शून्यता। शून्यतैवाऽनवकार शून्यता। अनवकारशून्यतैव शून्यता। या प्रकृतिशून्यतायाः शून्यता। न सा प्रकृतिशून्यता। न चाऽन्यत्र शून्यतायाः प्रकृतिशून्यता। नाऽन्यत्र प्रकृतिशून्यतायाः शून्यता। शून्यतैव प्रकृतिशून्यता। प्रकृतिशून्यतैव शून्यता। या सर्व्वधर्म्मशून्यतायाः शून्यता न सा सर्व्वधर्म्मशून्यता। न चाऽन्यत्र शून्यतायाः सर्व्वधर्म्मशून्यता। नाऽन्यत्र सर्व्वधर्म्मशून्यतायाः शून्यता। शून्यतैव सर्व्वधर्म्मशून्यता। सर्व्वधर्म्मशून्यतैव शून्यता। या स्वलक्षण-शून्यतायाः शून्यता न सा स्वलक्षणशून्यता। न चाऽन्यत्र शून्यतायाः स्वलक्षणशून्यता। नाऽन्यत्र स्वलक्षणशून्यतायाः शून्यता। शून्यतैव स्वलक्षणशून्यता। स्वलक्षणशून्यतैव शून्यता। या ऽनुपलम्भशून्यतायाः शून्यता न सा अनुपलम्भ शून्यता। न चाऽन्यत्र शून्यताया अनुपलम्भशून्यता। नाऽन्यत्राऽनुपलम्भशून्यतायाः शून्यता। शून्य-तैवानुपलम्भशून्यता। अनुपलम्भशून्यतैव शून्यता। या ऽभावशून्य-तायाः शून्यता न सा ऽभावशून्यता। न चाऽन्यत्र शून्यताया अभावशून्यता। नाऽन्यत्राऽभावशून्यतायाः शून्यता। शून्यतैवाऽभाव-शून्यता। अभावशून्यतैव शून्यता। या स्वभावशून्यतायाः शून्यता न सा स्वभावशून्यता। न चाऽन्यत्र शून्यतायाः स्वभावशून्यता। नाऽन्यत्र स्वभावशून्यतायाः शून्यता। शून्यतैव स्वभावशून्यता। स्वभावशून्यतैव शून्यता। या ऽभावस्वभावशून्यता न सा ऽभाव-स्वभावशून्यता। न चाऽन्यत्र शून्यताया अभावस्वभावशून्यता। नाऽन्यत्राऽभावस्वभावशून्यतायाः शून्यता। शून्यतैवाऽभावस्वभाव-शून्यता। अभावस्वभावशून्यतैव शून्यता।

या चतुर्णां स्मृत्युपस्थानानां शून्यता न तानि स्मृत्युपस्थानानि। न चाऽन्यत्र शून्यतायाः स्मृत्युपस्थानानि। नाऽन्यत्र स्मृत्युपस्थानेभ्यः शून्यता। शून्यतैव स्मृत्युपस्थानानि। स्मृत्युपस्थानान्येव शून्यता। या चतुर्णां सम्यक्प्रहाणानां शून्यता न तानि सम्यक्प्रहाणानि। न चाऽन्यत्र शून्यतायाः सम्यक्प्रहाणानि। नाऽन्यत्र सम्यक्प्रहाणेभ्यः शून्यता। शून्यतैव सम्यक्प्रहाणानि। सम्यक्प्रहाणान्येव शून्यता। या चतुर्णामृद्धिपादानां शून्यता न ते ऋद्धिपादाः। न चाऽन्यत्र शून्यताया ऋद्धिपादाः। नाऽन्यत्र ऋद्धिपादेभ्यः शून्यता। शून्यतैव ऋद्धिपादाः। ऋद्धिपादा एव शून्यता। या पञ्चानामिन्द्रियाणां शून्यता। न तानीन्द्रियाणि। न चाऽन्यत्र शून्यताया इन्द्रियाणि। नाऽन्यत्रेन्द्रियेभ्यः शून्यता। शून्यतैवेन्द्रियाणि। इन्द्रियाण्येव शून्यता। या पञ्चानां बलानां शून्यता न तानि बलानि। न चाऽन्यत्र शून्यतायाः बलानि। नाऽन्यत्र बलेभ्यः शून्यता। शून्यतैव बलानि। बलान्येव शून्यता। या सप्तानां बोध्यङ्गानां शून्यता। न तानि बोध्यङ्गानि। न चाऽन्यत्र शून्यतायाः बोध्यङ्गानि। नाऽन्यत्र बोध्यङ्गेभ्यः शून्यता। शून्यतैव बोध्यङ्गानि। बोध्यङ्गान्येव शून्यता।

या आर्य्याष्टाङ्गमार्गस्य शून्यता न स आर्य्याष्टाङ्गमार्गः। न चाऽन्यत्र शून्यताया आर्य्याष्टाङ्गमार्गः। नाऽन्यत्राऽर्य्याष्टाङ्गमार्गाच्छून्यता। शून्यतैवाऽर्य्याष्टाङ्गमार्गः। आर्य्याष्टाङ्गमार्ग एव शून्यता। या चतुर्णामार्य्यसत्यानां शून्यता। न तन्यार्य्यसत्यानि। न चाऽन्यत्र शून्यताया आर्य्यसत्यानि। नाऽन्यत्रार्य्यसत्येभ्य एव शून्यता। शून्यतैवार्य्यसत्यानि। आर्य्यसत्यान्येव शून्यता। या चतुर्णां ध्यानानां

शून्यता न तानि ध्यानानि। न चाऽन्यत्र ध्यानेभ्यः शून्यता। नाऽन्यत्र ध्यानेभ्यः शून्यता। शून्यतैव ध्यानानि। ध्यानान्येव शून्यता। या चतुर्णामप्रमाणानां शून्यता न तान्यप्रमाणानि। न चाऽन्यत्र शून्यताया अप्रमाणानि। नाऽन्यत्राऽप्रमाणेभ्यः शून्यता। शून्यतैवाऽप्रमाणानि। अप्रमाणान्येव शून्यता। या चतसृणामारूप्यसमापत्तीनां शून्यता न ता आरूप्यसमापत्तयः। न चाऽन्यत्र शून्यताया आरूप्यसमापत्तयः। नाऽन्यत्राऽरूप्यसमापत्तिभ्यः शून्यता। शून्यतैवाऽरूप्यसमापत्तयः। आरूप्यसमापत्तय एव शून्यता। या अष्टानां विमोक्षाणां शून्यता। न ते विमक्षाः। न चाऽन्यत्र शून्यतायाः विमोक्षाः। नाऽन्यत्र विमोक्षेभ्यः शून्यता। शून्यतैव विमोक्षाः। विमोक्षाएव शून्यता। या नवानुपूर्व्वविहारसमापत्तीनां शून्यता न ता अनुपूर्व्वविहारसमापत्तयः। न चाऽन्यत्र शून्यताया अनुपूर्व्वविहारसमापत्तयः। नाऽन्यत्रानुपूर्व्वविहारसमापत्तिभ्यः शून्यता। शून्यतैवाऽनुपूर्व्वविहारसमापत्तयः। आनुपूर्व्वविहारसमापत्तय एव शून्यता।

या शून्यता निमित्ताप्रणिहितविमोक्षमुखानां शून्यता। न तानि शून्यता निमित्ताप्रणिहितविमोक्षमुखानि। न चाऽन्यत्र शून्यतायाः शून्यता निमित्ताप्रणिहितविमोक्षमुखानि। नाऽन्यत्र शून्यता निमित्ताप्रणिहितविमोक्षमुखेभ्यः शून्यता। शून्यतैव शून्यता निमित्ताप्रणिहितविमोक्षमुखानि। शून्यता निमित्ताप्रणिहितविमोक्षमुखान्येव शून्यता। या पञ्चानामभिज्ञानां शून्यता न ता अभिज्ञाः। न चाऽन्यत्र शून्यताया अभिज्ञाः। नाऽन्यत्राभिज्ञाभ्यः शून्यता। शून्यतैवाऽभिज्ञाः। अभिज्ञा एव शून्यता। या समाधीनां

शून्यता न ते समाधयः। न चाऽन्यत्र शून्यतायाः समाधयः। नाऽन्यत्र समाधिभ्यः शून्यता। शून्यतैव समाधयः। समाधय एव शून्यता। या धारणीमुखानां शून्यता न तानि धारणीमुखानि। न चाऽन्यत्र शून्यतायाः धारणीमुखानि। नाऽन्यत्र धारणीमुखेभ्यः शून्यता। शून्यतैव धारणीमुखानि। धारणीमुखान्येव शून्यता। या दशानां तथागतबलानां शून्यता न तानि तथागतबलानि। न चाऽन्यत्र शून्यतायाः तथागतबलानि। नाऽन्यत्र तथागतबलेभ्यः शून्यता। शून्यतैव तथागतबलानि। तथागतबलान्येव शून्यता। या चतुर्णां वैशारद्यानां शून्यता न तानि वैशारद्यानि। न चाऽन्यत्र शून्यतायाः वैशारद्यानि। नाऽन्यत्र वैशारद्येभ्यः शून्यता। शून्यतैव वैशारद्यानि। वैशारद्यान्येव शून्यता। या चतसृणां प्रतिसम्विदां शून्यता न ताः प्रतिसम्विदः। न चाऽन्यत्र शून्यतायाः प्रतिसम्विदः। नाऽन्यत्र प्रतिसम्विद्‌भ्यः शून्यता। शून्यतैव प्रतिसम्विदः। प्रतिसम्विद एव शून्यता। या महामैत्र्याः शून्यता न सा महामैत्री। न चाऽन्यत्र शून्यतायाः महामैत्री। नाऽन्यत्र महामैत्र्याः शून्यता। शून्यतैव महामैत्री। महामैत्र्येव शून्यता। या महाकरुणायाः शून्यता न सा महाकरुणा। न चाऽन्यत्र शून्यतायाः महाकरुणा। नाऽन्यत्र महाकरुणायाः शून्यता। शून्यतैव महाकरुणा। महाकरुणैव शून्यता। याऽष्टादशानामावेणिकबुद्धधर्म्माणां शून्यता। न ते आवेणिकबुद्धधर्म्माः। न चाऽन्यत्र शून्यताया आवेणिकबुद्धधर्म्माः। नाऽन्यत्रावेणिकबुद्धधर्म्मेभ्यः शून्यता। शून्यतैवावेणिकबुद्धधर्म्माः। आवेणिकबुद्धधर्म्मा एव शून्यता।

या सर्व्वज्ञतायाः शून्यता न सा सर्व्वज्ञता । न चाऽन्यत्र शून्यतायाः सर्व्वज्ञता । नाऽन्यत्र सर्व्वज्ञतायाः शून्यता । शून्यतैव सर्व्वज्ञता । सर्व्वज्ञतैव शून्यता । या मार्गाकारज्ञतायाः शून्यता न सा मार्गाकारज्ञता । न चाऽन्यत्र शून्यतायाः मार्गाकारज्ञता । नाऽन्यत्र मार्गाकारज्ञतायाः शून्यता । शून्यतैव मार्गाकारज्ञता । मार्गाकारज्ञतैव शून्यता । या सर्व्वाकारज्ञतायाः शून्यता । न सा सर्व्वाकारज्ञता । न चाऽन्यत्र शून्यतायाः सर्व्वाकारज्ञता । नाऽन्यत्र सर्व्वाकारज्ञतायाः शून्यता । शून्यतैव सर्व्वाकारज्ञता । सर्व्वाकारज्ञतैव शून्यता ।

एवं ह्यायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन्नुपायकौशलो वेदितव्यः । एवं खल्वायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरन् भव्योऽनुत्तरां सम्यक्सम्बोधिमभिसम्बोद्धुं । स खलु पुनर्ब्बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरामीति नोपैति । न चरामीति नोपैति । चरामीति न चरामीति नोपैति । नैव चरामि च न चरामीति नोपैति । शारद्वतीपुत्र आह । केन कारणेनायुष्मन् सुभूते बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरंश्चरामीति नोपैति न चरामीति नोपैति । चरामि च न चरामीति नोपैति । नैव चरामि च न चरामीत्येवमपि नोपैति । सुभूतिराह । तथाह्यायुष्मञ्छारद्वतीपुत्र प्रज्ञापारमितायां स्वभावोनोपलभ्यते । तत्कस्य हेतोस्तथाह्यभावस्वभावाप्रज्ञापारमिता । अनेनायुष्मञ्छारद्वतीपुत्र पर्य्यायेण बोधिसत्त्वोमहासत्त्वः प्रज्ञापारमितायां चरामीति नोपैति । न चरामीति नोपैति ।

चरामि च न चरामीति नोपैति। नैव चरामि च न चरामीत्येवमपि नोपैति। तत्कस्य हेतोस्तथाहि तेन सर्व्वधर्म्मा अभावस्वभावा इत्यनुगता अनुपात्ताः। न चेदेवं प्रज्ञापारमितायां चरतो बोधिसत्त्वस्य महासत्त्वस्य चित्तं नावलीयते। न संलीयते नोत्त्रस्यति न संत्रस्यति। न संत्रासमापद्यते। वेदितव्यमायुष्मञ्छारद्वतीपुत्रासन्नीभवत्ययं बोधिसत्त्वोमहासत्त्वः सर्व्वाकारज्ञताया इति।

सापि खलु सर्व्वाकारज्ञता अद्वया अद्वैधीकारा सर्व्वधर्म्माभावस्वभावतामुपादाय। अयं सर्व्वधर्म्मानुत्पादोनाम समाधिर्व्बोधिसत्त्वानां महासत्त्वानां विपुलःपुरस्कृतोऽप्रमाणनियतः असंहार्य्यः सर्व्वश्रावकप्रत्येकबुद्धैः। अनेन समाधिनाविहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्भोत्स्यते।

आह। किं पुनरायुष्मन् सुभूते अनेनैव समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अथान्यैरपि समाधिभिः। सुभूतिराह अन्यैरप्यायुष्मञ्छारद्वतीपुत्र समाधिभिर्व्विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। आह कतमैः पुनरायुष्मन् सुभूतेऽन्यैः समाधिभिर्व्विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। सुभूतिराह। अस्ति शूरङ्गमोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सिंहविक्रीड़ितोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सुचन्द्रोनाम समाधिर्येन समाधिना विहरन्

बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति चन्द्रध्वजकेतुर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति सर्व्वधर्म्मोद्गतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति सर्व्वधर्म्ममुद्रोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विलोकितमूर्द्धानाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्तः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति धर्म्मधातुनियतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति नियतध्वजकेतुर्नाम समाधिर्येन समाधिनाविहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति वज्रोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वधर्म्मप्रवेशमुद्रोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति रश्मिप्रमुक्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति बलव्युहोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति समुद्गतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति निरुक्तिनियत-

प्रवेशोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्त्यधिवचन संप्रवेशोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति दिग्विलोकितोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्याधारमुद्रोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यसंप्रमोषोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति सर्व्वधर्म्मसमवसरणमुद्रोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्त्याकाशस्फुरणोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति वज्रमण्डलोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति ध्वजाग्रकेयूरोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्तीन्द्रकेतुर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति स्रोतोऽनुगतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति *सिंहविक्रीड़ितोनाम समाधिर्येन समाधिना विहरन् बोधि-

* क, ख, ग, घ पुस्तकेषु पाठः ।

सत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति व्यभ्यस्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति वैरोचनोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यनेषोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यनिकेतस्थितोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति निश्चिन्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विमलप्रदीपोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यनन्तप्रभोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति प्रभाकरोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति समन्तावभासोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति शुद्धावभासोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्ति रतिकरोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विद्युत्प्रदीपोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहा-

सत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यक्षयोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यजयोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति तेजोरतीनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति क्षयापगतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्त्यनिञ्जोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विवर्णोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्ति सूर्य्यप्रदीपोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति चन्द्रविमलोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति प्रज्ञाप्रदीपोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति शुद्धप्रतिभासोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यालोकोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति काराकारोनाम समाधिर्येन समाधिना विहरन्

बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति ज्ञानकेतुर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते ।

अस्ति वज्रोपमोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति चित्तस्थितिर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति समन्तालोकोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति सुप्रतिष्ठितोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति रत्नकोटिर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते ।

अस्ति वरधर्म्ममुद्रोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति सर्व्वधर्म्मसमतानाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति रतिजहोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति धर्म्मोद्गतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति विकिरणोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां

सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वधर्म्मपदप्रभेदोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति समाचराक्षरकारोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यक्षरागतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्त्यावरणच्छेदोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यविकारोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यप्रकारोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति नामनियतप्रवेशोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यनिकेतचारीनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति तिमिरापगतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति चारित्रवतीनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यचलोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विषयतीर्णोनाम समा-

धिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वगुणसञ्चयोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्ति स्थितनिश्चित्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति शुभपुष्पितशुद्धिर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति बोध्यङ्गवतीनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यनन्तप्रभोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यसमसमोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वधर्म्मातिक्रमणोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति परिच्छेदकरोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्ति विमतिविकरोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति निरधिष्ठानोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्येकव्यूहोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः

क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्याकारोऽभिनिर्हारो-नामसमाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्र-मनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्येकाकारोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्-सम्बोधिमभिसम्बुध्यते। अस्त्याकारानाकारोनाम समाधिर्येन समा-धिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधि-मभिसम्बुध्यते।

अस्ति नैर्वेधिकसर्व्वभवतलापगतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभि-सम्बुध्यते। अस्ति सर्व्वसङ्केतरुतप्रवेशोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभि-सम्बुध्यते। अस्ति गिरिघोषाक्षरविमुक्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभि-सम्बुध्यते। अस्ति ज्वलनोल्कोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति लक्षणपरिशोधनोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्त्यनाविलक्षान्तिर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वाकारवरोपेतनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वसुखदुःखनिरभिनन्दीनाम समाधिर्येन समाधिना विहरन्

बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्त्यक्षयकरण्डोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वो-महासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति धारणीमतिर्नाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वो-महासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सम्यक्-त्वमिथ्यात्वसर्व्वसंग्रहणोनाम समाधिर्येन समाधिना विहरन् बोधि-सत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्ति सर्व्वरोधनिरोधसंप्रशमनोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभि-सम्बुध्यते। अस्त्यनुरोधाप्रतिरोधोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विमलप्रभासोनाम समाधिर्येन समाधिना विहरन् बोधि-सत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते।

अस्ति शारवतीनाम समाधिर्येन समाधिना विहरन् बोधि-सत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति परिपूर्णचन्द्रविमलोनाम समाधिर्येन समाधिना विहरन् बोधि-सत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति विद्युत्प्रभोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति महाव्यूहोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते। अस्ति सर्व्वलोकप्रभाकरोनाम समाधि-र्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः क्षिप्रमनुत्तरां

सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति समाधिसमतानाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्-सम्बोधिमभिसम्बुध्यते ।

अस्त्यरजोविरजोनययुक्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्त्यरणसमवसरणोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्त्यरणसरणसर्व्वसमवसरणोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्त्यनिलम्भनिकेतनिरतोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति तथता स्थितनिश्चित्तोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति कायकलिसंप्रमथनोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति वारकलिविध्वंसनगगणकल्पोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्त्याकाशाऽसङ्गविमुक्तिनिरूपधिशेषोनाम समाधिर्येन समाधिना विहरन् बोधिसत्त्वोमहासत्त्वः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यते । अस्ति इमे आयुष्मञ्छारद्वतीपुत्रसमाधयो बोधिसत्त्वानां महासत्त्वानां यैः समाधिभिर्व्विहरन्तो बोधिसत्त्वामहासत्त्वाः चिप्रमनुत्तरां सम्यक्सम्बोधिमभिसम्बुध्यन्ते ।

अथ बुद्धानुभावेनायुष्मान् सुभूतिः पुनरप्येवमाह। व्याकृतो-वतारमायुष्मञ्छारद्वतीपुत्र बोधिसत्त्वोमहासत्त्वस्तैः पौर्व्वकैस्तथागतै-रर्हद्भिः सम्यक्सम्बुद्धैरनुत्तरायां सम्यक्सम्बोधौ। येऽपि तत्र तर्हि दशसु दिक्षु गङ्गानदीवालुकोपमेषु लोकधातुषु तथागताः सम्यक्-सम्बुद्धास्तिष्ठन्ति ध्रियन्ते यापयन्ति। तेऽपि तथागताः सम्यक्सम्बु-द्धास्तं बोधिसत्त्वं व्याकुर्व्वन्ति य एभिः समाधिभिर्व्विहरति। समाधि-मपि न समनुपश्यति। नापि तेन समाधिनामन्यते। अहं समा-हित इति अहं समापत्स्य इत्यहं समापद्य इत्यहं समापन्नवानिति। सर्व्वत्र ते तस्य बोधिसत्त्वस्य महासत्त्वस्य विकल्पा न संविद्यन्ते न प्रवर्त्तन्ते।

आह। किं पुनरायुष्मन् सुभूतेऽत्र समाधिषु स्थितो बोधिसत्त्वोमहासत्त्वो व्याक्रियते तथागतैरर्हद्भिः सम्यक्सम्बुद्धैः। सुभूतिराह। नोहीदमायुष्मञ्छारद्वतीपुत्र, तत्कस्य हेतोर्नह्यायु-ष्मञ्छारद्वतीपुत्राऽन्याप्रज्ञापारमिताऽन्यः समाधिरन्यो बोधिसत्त्वः। प्रज्ञापारमितैव समाधिसमाधिरेव बोधिसत्त्वः, बोधिसत्त्व एव समाधिः। आह आयुष्मन् सुभूते नान्यः समाधिरन्यो बोधिसत्त्वो नान्यो बोधिसत्त्वोऽन्यः समाधिः। समाधिरेव बोधिसत्त्वो बोधिसत्त्व एव समाधिः सर्व्वधर्म्मसमतामुपादाय। तत् किं पुनः शक्यं समाधिं दर्शयितुं। सुभूतिराह। नोहीदमायुष्मञ्छारद्वतीपुत्र। आह किं पुनरायुष्मन् सुभूते सकुलपुत्रस्तं समाधिं संजानाति। सुभूतिराह। न संजानात्यायुष्मञ्छारद्वतीपुत्र। आह। तत्कथं न संजानाति। सुभूतिराह। यथा न कल्पयति। आह। कस्मादायुष्मन् सुभूते

न विजानाति न संजानाति। सुभूतिराह। अविद्यमानत्वात्तस्य समाधेस्तस्य बोधिसत्त्वस्य। न विजानाति न संजानाति।

अथ भगवानायुष्मते सुभूतये साधुकारमदात्। साधु साधु सुभूते। सुभाषितैषा वाक्। यथापि ते मया विहारिणां श्रावकानामग्रतायां निर्दिष्टस्तस्यायमुपदेशः। एवञ्च बोधिसत्त्वेन महासत्त्वेन प्रज्ञापारमितायां शिक्षितव्यं। ध्यानपारमितायां शिक्षितव्यं। वीर्य्यपारमितायां शिक्षितव्यं। क्षान्तिपारमितायां शिक्षितव्यं। शीलपारमितायां शिक्षितव्यं। दानपारमितायां शिक्षितव्यं। स्मृत्युपस्थानेषु शिक्षितव्यं। सम्यक्प्रहाणेषु शिक्षितव्यं। ऋद्धिपादेषु शिक्षितव्यं। इन्द्रियेषु शिक्षितव्यं। बलेषु शिक्षितव्यं। बोध्यङ्गेषु शिक्षितव्यं। आर्य्याष्टाङ्गमार्गे शिक्षितव्यं। आर्य्यसत्येषु शिक्षितव्यं। ध्यानेषु शिक्षितव्यं। अप्रमाणेषु शिक्षितव्यं। आरूप्यसमापत्तिषु शिक्षितव्यं। विमोक्षेषु शिक्षितव्यं। अनुपूर्व्वविहारसमापत्तिषु शिक्षितव्यं। शून्यता निमित्ताऽप्रणिहितविमोक्षमुखेषु शिक्षितव्यं। अभिज्ञासु शिक्षितव्यं। समाधिषु शिक्षितव्यं। धारणीमुखेषु शिक्षितव्यं। तथागतबलेषु शिक्षितव्यं। वैशारद्येषु शिक्षितव्यं। प्रतिसम्विल्सु शिक्षितव्यं। महामैत्र्यां शिक्षितव्यं। महाकरुणायां शिक्षितव्यं। आवेणिकबुद्धधर्म्मेषु शिक्षितव्यं।

अथायुष्मान्छारद्वतीपुत्रो भगवन्तमेतदवोचत्। एवं शिक्षमाणो भगवन् बोधिसत्त्वो महासत्त्वः प्रज्ञापारमितायां शिक्षतेऽनुपलम्भयोगेन। ध्यानपारमितायां शिक्षतेऽनुपलम्भयोगेन। वीर्य्यपारमितायां शिक्षतेऽनुपलम्भयोगेन। क्षान्तिपारमितायां शिक्षतेऽनुप-

लम्भयोगेन। शीलपारमितायां शिचतेऽनुपलम्भयोगेन। दानपारमितायां शिचतेऽनुपलम्भयोगेन। स्मृत्युपस्थानेषु शिचतेऽनुपलम्भयोगेन। सम्यक्प्रहाणेषु शिचतेऽनुपलम्भयोगेन। ऋद्धिपादेषु शिचतेऽनुपलम्भयोगेन। इन्द्रियेषु शिचतेऽनुपलम्भयोगेन। बलेषु शिचतेऽनुपलम्भयोगेन। बोध्यङ्गेषु शिचतेऽनुपलम्भयोगेन। आर्य्याष्टाङ्गमार्गे शिचतेऽनुपलम्भयोगेन। आर्य्यसत्येषु शिचतेऽनुपलम्भयोगेन। ध्यानेषु शिचतेऽनुपलम्भयोगेन। अप्रमाणेषु शिचतेऽनुपलम्भयोगेन। आरूप्यसमापत्तिषु शिचतेऽनुपलम्भयोगेन। अनुपूर्व्वविहारसमापत्तिषु शिचतेऽनुपलम्भयोगेन। शून्यतानिमित्ताप्रणिहितविमोचमुखेषु शिचतेऽनुपलम्भयोगेन। अभिज्ञासु शिचतेऽनुपलम्भयोगेन। धारणीमुखेषु शिचतेऽनुपलम्भयोगेन। तथागतबलेषु शिचतेऽनुपलम्भयोगेन। वैशारद्येषु शिचतेऽनुपलम्भयोगेन। प्रतिसम्वित्सु शिचतेऽनुपलम्भयोगेन। महामैत्र्यां शिचतेऽनुपलम्भयोगेन। महाकरुणायां शिचतेऽनुपलम्भयोगेन। आवेणिकबुद्धधर्म्मेषु शिचतेऽनुपलम्भयोगेन।

